॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

# ॥ अथ श्रीचित्रसेनपद्मावतीचरित्रं प्रारभ्यते ॥

( गुर्जरभाषांतरोपेतं )

( मूलकर्ता—श्रीराजवल्लभोपाध्यायः. भाषांतरकर्ता—मनसुखलाल हीरालाल लालन.)

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज. (जामनगरवाळा)

नत्वा जिनपतिमाद्यं । पुंडरीकं गणाधिपं ॥ शीलालंकारसंयुक्तां । साश्चर्यां हि कथां ब्रुवे ॥
॥ १ ॥ इहैव भरतक्षेत्रे । देशे नाम्ना कलिंगके ॥ धनधान्यसमाकीर्णं । वसंतपुरपत्तनं ॥ २ ॥ प्रा·

---

शांतिनाथं नमस्कृत्य । भव्यपंकजभास्करं ॥ चित्रसेनचरित्रस्य । गूर्जरार्थो विलिख्यते ॥ १ ॥
श्री आदीश्वरप्रभुने तथा पुंडरीक गणधरने नमस्कार करीने शीलालंकार सहित तथा आश्चर्य-
कारी कथा कहुंछुं. ॥ १ ॥ आज भरतक्षेत्रमां कलिंग नामना देशमां धनधान्यथी भरपूर वसंतपुर

सादमंदिराकीर्णे । सरआरामशोभिते ॥ श्रेष्ठिनो बहवस्तत्र । वसंति धनदोपमाः ॥ ३ ॥ प्रजायाः पालने दक्षो । दाता शूरो दयापरः ॥ स्वगुणैः क्षितिविख्यातो । वीरसेनो नराधिपः ॥ ४ ॥ रूप· यौवनसंपन्ना । सौभाग्यादिगुणान्विता ॥ तत्प्रिया रत्नमालाभूत् । सतीजनमतल्लिका ॥ ५ ॥ तत्पु· त्रोऽस्ति गुणाधारः । सदाचारिशिरोमणिः ॥ दाता वीरस्तथा शूरः । कुमारश्चित्रसेनकः ॥ ६ ॥ बु· द्धिसाराभिधो मंत्री । बुद्धिमान् विनयी नयी ॥ चतुरश्चारुमूर्त्तिस्तु । राजकार्ये धुरंधरः ॥ ७ ॥ रत्न·

---

नामे शहेर छे. ॥ २ ॥ हवेलीउ मंदिरो सरोवरो अने आरामोथी शोभिता एवा ते शहेरमां कु- बेरजेवा धनवान घणा श्रेष्ठीउ रहे छे, ॥३॥ (त्यां) प्रजाने पाळवामां कुशळ, दानी, शूरवीर, दयाळू अने पोताना गुणोथी पृथ्वीमां प्रख्यात थयेलो वीरसेन नामनो राजा ( राज्य करे ) छे. ॥ ४ ॥ तेने रूप अने यौवनथी संपन्न, सौभाग्य विगेरे गुणवाळी, तथा सतीउमां श्रेष्ठ एवी रत्नमाला ( नामनी ) राणी छे. ॥ ५ ॥ तेउने गुणी, सदाचारीउमां श्रेष्ठ, दातार, तथा शूरवीर एवा चित्र- सेन ( नामनो ) कुमार छे. ॥ ६ ॥ ( ते राज्यमां ) बुद्धिवान्, विनयी, न्यायी, चतुर, सुंदर, अने राजकार्यमां धुरंधर एवो बुद्धिसार नामनो मंत्री छे ॥ ७ ॥ ते मंत्रीने रत्ननी कांति सरखो अद्भुत

सारः सुतस्तस्य । रत्नकांतिरिवाद्भुतः ॥ निपुणः सर्वशास्त्रेषु । सुशीलः सत्यसंगरः ॥ ८ ॥ प्रीतिः परस्परं जाता । मंत्रिराजभुवोस्तयोः ॥ छायापराह्णजेवाथ । ववृधे साधिकाधिकं ॥ ९ ॥ एकदा स्वसभासीनो । वीरसेनो नरेश्वरः ॥ समस्तनगरीलोकैः । समागत्य नमस्कृतः ॥ १० ॥ तेषां कुशलमापृच्छ्य । तदा सन्मानपूर्वकं ॥ पृछतिस्म धराधीशः । समागमनकारणं ॥ ११ ॥ तेषामेको बभाषेऽथ । स्वामिन्नेषा त्वया प्रजा ॥ पालिता पुत्रवन्नित्यं । किंचित्संतापिताधुना ॥ १२ ॥ तव एष सु

---

सर्व शास्त्रमां निपुण, सदाचारी, अने सत्यवादी एवो रत्नसार (नामनो) पुत्र छे. ॥ ८ ॥ राजकुमार, अने मंत्रिपुत्र बंनेने परस्पर प्रीति बंधाणी, (अने) ते पाछला पहोरनी छायानी पेठे अधिक अधिक वधवा मांडी. ॥ ९ ॥ एक दिवस वीरसेन राजा सभामां बेठो छे, (तेवामां) शहेरना सर्व लोकोए आवीने तेने प्रणाम कर्या, ॥ १० ॥ त्यारे राजाए तेउने सन्मानपूर्वक कुशळ समाचार पूछीने आववानुं कारण पूछयुं, ॥ ११ ॥ त्यारे तेउमांथी एक बोल्यो हे स्वामिन् ! तमोए प्रजानु (हंमेशां) पुत्रनी पेठे पालन कर्युं छे, परंतु ते हमणा जरा संताप पामी छे. ॥ १२ ॥ हे स्वामिन् ! साक्षात कामदेव जेवो आपनो पुत्र शहेरमां रात्रिदिवस यथेछ फरे छे.

तः स्वामिन् । साक्षात्कंदर्पसोदरः ॥ भ्रमते हि दिवारात्रौ । पुरमध्ये यथेच्छया ॥ १३ ॥ मोहितस्त-
स्य रूपेण । सर्वः पौरांगनागणः ॥ स्वकार्यविमुखीभूय । तस्य पृष्टे हि धावति ॥ १४ ॥ रक्षणीयः
कुमारोऽसौ । सावधानतया ततः ॥ प्रासादे च स्वकीये य—द्यत्नो रत्नेऽपि युज्यते ॥ १५ ॥ य-
तः—यस्मिन् कुले यः पुरुषः प्रधानः । स एव यत्नात्परिरक्षणीयः ॥ तस्मिन् विनष्टे हि कुलं विन-
ष्टं । न नाभिभंगे ह्यरका वहंति ॥ १६ ॥ इति श्रुत्वा महीनाथ—श्चिंतयामास मानसे ॥ धनस्य
यौवनस्यापि । धन्य एव मदं त्यजेत् ॥ १७ ॥ प्रजोद्वेगकरो यो हि । कार्यं किं तेन सूनुना ॥ क-

---

॥ १३ ॥ ( तेथी ) नगरनी स्त्रीजनो समूह तेनापर मोहित थयो थको पोतपोतानां कार्यथी वि-
मुख थइने तेनी पाछळ दोडे छे. ॥ १४ ॥ माटे आपे तेने पोताना महेलमां सावधानीथी रा-
खवो जोइए, कारणके रत्न होय ते साचवीने राखवुं जोइए. ॥ १५ ॥ कह्युं छे के—जे कुळमां
जे पुरुष प्रधान होय तेनुं यत्नथी रक्षण करवुं जोइए, कारणके तेना नाश पामवाथी आखुं कुळ
नाश पामे छे, जेम धूरीना भांगवाथी आरा चालता नथी. ॥ १६ ॥ आ सांभळी राजा मनमां
चिंतववा लाग्यो के कोइ धन्य पुरुषज धनयौवननो मद तजी शके छे. ॥ १७ ॥ जे प्रजाने उ-

र्णं त्रोटयते यत्तु । तत्स्वर्णं निष्प्रयोजनं ॥ १७ ॥ विचिंत्येति नृपेणाथ—देशो देशाटनाय हि ॥ दत्तस्तस्मै कुमाराय । चित्रसेनाय कोपतः ॥ १८ ॥ वज्रपातादिवाकस्मा—त्कुमारः खेदमाप सः ॥ नरेंद्रो विधिवत्पुंसां । करोति हि शुभाशुभं ॥ १९ ॥ नमस्कृत्य पितुः पादौ । स मातुर्मिलने गतः ॥ पुत्रमोहाद्ददे तस्मै । तथा रत्नानि सप्त च ॥ २० ॥ करवालं समादाय । नत्वा च जननीं निजां ॥ रत्नसारस्य मित्रस्य । गृहेऽसौ चपलं ययौ ॥ २१ ॥ उद्विग्नचित्तकं दृष्ट्वा । मित्रं निजगृहागतं ॥ विस्मयाकुलचित्तेन । तेन पृष्टं तदा द्रुतं ॥ २२ ॥ कथं ग्रामांतरं यासि । सत्यं कथय

---

छेग करनारो थाय तेवा पुत्रनुं मारे शुं काम छे? जे सोनुं कान तोडी नाखे ते नकामुं छे ॥ ॥ १७ ॥ एवीरीते विचारी राजाए कुमारपर कोप करीने तेने देशाटननो हुकम आप्यो. ॥१८॥ आ सांभळी कुमार अकस्मात वज्र पडे तेवीरीते खेद पाम्यो. विधिनी पेठे राजा पण मनुष्यनुं शुभाशुभ करी शके छे ॥ १९ ॥ (हवे) कुमार पिताने नमस्कार करीने पोतानी माताने मळवा गयो, त्यां तेणीए पुत्रमोहथी तेने सात रत्न आप्यां ॥ २० ॥ (त्यार पछी) ने तरवार लइने माताने नमीने पोताना मित्र रत्नसारने घेर तुरत गयो. ॥ २१ ॥ रत्नसारे पोताना मित्रने उद्विग्न

मित्र मे ॥ संशये पतितं मे च । निःशल्यं कुरु मानसं ॥२३॥ यतः—ददाति प्रतिगृह्णाति । गुह्यमाख्याति पृच्छति ॥ भुंक्ते भोजयते नित्यं । षड्विधं प्रीतिलक्षणं ॥ २४ ॥ मित्रस्य हितकर्ता च । हितज्ञो हितचिंतकः ॥ परोक्षेऽपि च तत्प्रोक्तं । सत्यमित्रस्य लक्षणं ॥ २५ ॥ प्रत्यक्षे गुरुवत्सुहृत् । परोक्षे बंधुसन्निभः ॥ कार्ये च दासवद्यो हि । पुत्रतुल्यो मृतस्त्रियः ॥ २६ ॥ श्रुत्वेति तेन वृत्तांतो । मित्राय कथितो निजः ॥ प्रोक्तं च मित्र तेनैव । विदेशे गम्यते मया ॥ २७ ॥ अथावग

---

चित्तवाळो पोताने घेर आवेलो जोइने चकित थइने तुरत पूछयुं. ॥ २२ ॥ हे मित्र तुं शामाटे देशांतर जाय छे ? ते मने सत्य कहीने संशयमां पडेला मारा मनने निःशल्य कर. ॥ २३ ॥ कह्युं छे के— देवुं १, लेवुं २, गुह्य वात कहेवी ३, पूछवी ४, जमवुं ५, अने जमाडवुं, ए ६ प्रीतिनां लक्षण होय छे. ॥ २४ ॥ परोक्षमां पण मित्रनुं हित करनार, हित जाणनार अने हित चिंतवनार होय ते सत्य मित्रना लक्षण होय छे, ॥ २५ ॥ प्रत्यक्षमां गुरुजेवो, परोक्षमां बंधुजेवो, कार्यमां दासजेवो अने स्त्री मरण पामतां पुत्र जेवो रहे ते सत्य मित्र ( कहेवाय ) छे. ॥ २६ ॥ आ सांभळीने कुमार पोतानो सघळो वृत्तांत तेने कही बोल्यो हे मित्र ! तेज कारणथी हुं वि-

रत्नसारोऽपि । मित्रदुःखेन दुःखितः ॥ मित्र त्वया विनाहं तु । स्थातुं नैव क्षणं क्षमः ॥ २७ ॥ एको जीवो द्विधा देहो । ह्यावयोस्तन्मया ध्रुवं ॥ सुखं वा यदि वा दुःखं । सोढव्यं हि त्वया सह ॥ ॥ २८ ॥ ज्ञेया वियोगतो नूनं । स्नेहे दत्ता जलांजलिः ॥ इति निश्चित्य मनसि । प्रच्छन्नं चलितौ च तौ ॥ २९ ॥ अविलंबप्रयाणेन । प्राप्तौ तावटवीं क्रमात ॥ गतो ह्यस्ताचले भानुः । स्थितौ तौ च तरोस्तले ॥ ३० ॥ मार्गप्रवासतः खिन्नः । प्रसुप्तो राजनंदनः ॥ तदैव रत्नसारस्तु । शुश्रुवे किन्नरध्वनिं ॥ ३१ ॥ विस्मयाक्षिप्तचित्तोऽसौ । प्रबोध्य सुहृदं निजं ॥ न्यवेदयच्च साश्चर्यं । ध्वनिं तं

---

देश जाउं बुं. ॥ २७ ॥ आ सांभळी मित्रदुःखथी दुःखी थयेलो रत्नसार बोल्यो हे मित्र ! तारा विना हुं जरापण रही शकुं तेम नथी. ॥ २७ ॥ आपणा बेनां शरीर जुदां छे, (परंतु) जीव एक छे, तेथी तारी साथे सुख अथवा दुःख मारे पण सहन करवां जोइए. ॥ २८ ॥ वियोगथी स्नेहने जलांजली देवाय जाय छे, एम मनमां निश्चय करीने ते बंने गुपचुप चालता थया, ॥ ॥ २९ ॥ अविलंब प्रयाणथी चालतां थकां तेओ ज्यारे अटवीमां आव्या त्यारे सूर्यास्त थवाथी बंने एक वृक्ष नीचे रह्या. ॥ ३० ॥ मार्गमां प्रवासथी खिन्न थयेलो राजकुमार ज्यारे सूतो त्यारे

हर्षदायकं ॥ ३२ ॥ चित्रसेनस्तदावादीत् । स्वभावात्कौतुकप्रियः ॥ अहं तत्र गमिष्यामि । त्वया स्थातव्यमत्र भोः ॥ ३३ ॥ मंत्रिपुत्रो जगादाथ । मित्रात्र भीषणे वने ॥ एकाकिना त्वया नूनं । तत्र गंतु न युज्यते ॥ ३४ ॥ हसित्वासौ तदावादीत । क्षत्रिणां च भयं कुतः ॥ तेनेत्युक्तेऽचलत् सार्धं । रत्नसारोऽपि सत्ववान् ॥ ३५ ॥ क्रमात्ताभ्यां तदा दृष्टं । युगादिजिनमंदिरं ॥ अनेकदेवदेवेंद्र—मंडितं किन्नरैर्वृतं ॥ ३६ ॥ अष्टाह्निकोत्सवे तत्र । नृत्यमानाः सुरांगनाः ॥ गायंति मधुरध्वा-

---

रत्नसारे कोइ किन्नरनो स्वर सांभळ्यो. ॥ ३१ ॥ ( ते सांभळी ) विस्मितचित्तवाळा रत्नसारे पोताना मित्रने जगाडी आश्चर्य सहित ते हर्ष आपनार स्वरनी वात कही. ॥ ३२ ॥ त्यारे स्वभावथीज कौतुकप्रिय एवो चित्रसेन बोल्यो के हुं त्यां जाउं बुं. अने तारे अहिं रहेवुं. ॥ ३३ ॥ ( आ सांभळी ) मंत्रिपुत्र बोल्यो हे मित्र ! आ भयानक अटवीमां तारे एकला जवुं योग्य नथी. ॥ ३४ ॥ त्यारे कुमारे जरा हसीने कह्युं क्षत्रियोने भय शानो ? तेना एम कहेवा छतां पण बळवान् रत्नसार तेनी साथे चाल्यो. ॥ ३५ ॥ अनुक्रमे तेउए अनेक इंद्र देव किन्नर विगेरेथी शोभितुं आदीश्वर प्रभुनुं देवालय जोयुं. ॥ ३६ ॥ त्यां अठाइमहोत्सवमां सुरांगनाउ नृत्य

नै—र्जिनेश्वरगुणावलिं ॥ ३७ ॥ नमस्कृत्य जिनाधीशं । स्तुत्वा च विधिपूर्वकं ॥ सुहृदौ तौ सुभा-
वेन । मंडपे संस्थितौ मुदा ॥ ३८ ॥ सुंदराकाररूपात्र । दृष्टैका शालभंजिका ॥ तदा राजकुमारे-
ण । देवीवातिमनोहरा ॥ ३९ ॥ मोहितो रूपतस्तस्या । मूर्छितो राजनंदनः ॥ शीतोपचारैर्मित्रेण
। सावधानीकृतो द्रुतं ॥ ४० ॥ मूर्छाकारणमपृछ—त्कुमारोऽप्यवदत्तदा ॥ एषा पुत्तलिका कस्या ।
अनुसारेण निर्मिता ॥ ४१ ॥ यस्या रूपानुसारेण । कृता पुत्तलिका ह्यसौ ॥ सा कुमारी मयोद्वा-
ह्या—न्यथा मे काष्टभक्षणं ॥ ४२ ॥ रत्नसारो जगादाथ । मित्रदुःखेन दुःखितः ॥ आकाशपुष्प-

---

करती थकी मधुर स्वरथी जिनेश्वरना गुणो गाती हती ॥ ३७ ॥ त्यां ते बन्ने जिनेश्वरने नमीने विधिपूर्वक स्तुति करीने सारा जावथी रंगमंडपमां उभा. ॥ ३८ ॥ त्यां राजकुमारे सुंदर आकार अने रूपवाळी तथा देवीनी पेठे अतिमनोहर एक पुतळी जोइ. ॥ ३९ ॥ कुमार तेणीना रूपथी मोहित थइ त्यां मूर्छा पाम्यो, परंतु तेना मित्रे शीतल उपचारथी तुरत तेने सावधान कर्यो ॥ ॥ ४० ॥ ज्यारे तेणे कुमारने मूर्छानुं कारण पूछ्युं, त्यारे कुमार बोल्यो आ पुतळी कोना अनुसारे बनावी हशे? ॥ ४१ ॥ जे कुमारीनां रूपना अनुसारे आ पुतळी बनावी छे, तेज कुमारी हुं परणी-

वद् ज्ञेय—मेतत्कार्यं तु दुष्करं ॥ ४३ ॥

इतश्च पुण्ययोगेन । चिंतितार्थनिरूपकः ॥ चतुर्ज्ञानधरः साधु—रेकस्तत्र समागतः ॥ ४५ ॥ कुमारः सह मित्रेण । नमस्कृत्य मुनीश्वरं ॥ विनयादग्रतश्चैन—मुपविष्टः कृतांजलिः ॥ ४६ ॥ देशनांते नमन्मौलि—रपृछन्मंत्रिजो मुनिं ॥ एषा पुत्तलिका कस्या । अनुसारेण निर्मिता ॥ ॥ ४७ ॥ एतद्वचनमाकर्ण्य । जगाद मुनिपुंगवः ॥ वत्स शृणु तद्वृत्तांत—मद्भुतं कर्णसौख्यदं ॥

---

श, नहितर चिताप्रवेश करीश. ॥ ४२ ॥ आ सांभळी मित्रदुःखथी पीडायेलो रत्नसार बोल्यो के आ कार्य तो आकाशपुष्प पेठे दुःसाध्य छे. ॥ ४३ ॥

एवामां पुण्यना योगथी चिंतित वस्तुना जाणकार एक चतुर्ज्ञानी मुनि त्यां आवी पहोंच्या. ॥ ४५ ॥ कुमार पोताना मित्र सहित ते मुनीने नमीने विनयथी अंजली जोडी तेनी पासे बेठो. ॥ ४६ ॥ देशनाने अंते रत्नसारे मस्तक नमावीने मुनीने पूछ्युं के आ पुतळी कोना अनुसारे बनावेली छे ? ॥ ४७ ॥ आ वचन सांभळीने ते मुनिराज बोल्या हे वत्स ! अद्भुत अने कानने प्रिय एवुं तेनुं वृत्तांत सांभळ ? ॥ ४८ ॥ सुवर्णथी भरपूर एवुं कंचनपुर ( नामनुं एक ) शहेर छे,

॥ ४८ ॥ पुरं कंचनपुराख्य—मस्ति कांचनपूरितं ॥ यत्र वर्णाश्च चत्वारो । वसंति धनसंयुताः ॥
॥ ४९ ॥ विश्वकर्मावतारस्तु । सूत्रधारो गुणाभिधः ॥ तत्र गुणश्रियः स्वामी । सुताः पंच तयोर्वराः
॥ ५० ॥ धनदेवो धनसारो । गुणदेवो गुणाकरः ॥ पंचमः सागरो नाम्ना । कलानामेकसागरः ॥
॥५१॥ पंचानामपि पुत्राणां । पाठयित्वा यथाविधि ॥ परिणाय्य सुताः सर्वे । कृतास्तेन पृथक्पृथक्
॥ ५२ ॥ सागराख्यो लघुस्तेषां । सुतो गुणगणान्वितः ॥ कलावान् सत्यसंयुक्तो । जैनधर्मरतस्तदा
॥५३॥ प्रिया तस्य प्रियालापा । पतिचित्तानुगामिनी ॥ सागरस्य प्रिया नित्यं । नाम्ना सत्यवतीति सा

---

ज्यां धनवान एवा चारे वर्ण रहे छे. ॥ ४९ ॥ त्यां साक्षात् विश्वकर्माना अवतार जेवो गुणश्रीनो पति गुण नामनो सुतार रहे छे, तेने पांच उत्तम पुत्रो हता. ॥ ५० ॥ धनदेव, धनसार, गुणदेव गुणाकर, अने पांचमो कळाना सागररूप सागर नामनो पुत्र हतो. ॥ ५१ ॥ तेणे ते पांचे पुत्रोने योग्यरीते अभ्यास करावी, सघळाउने परणावी, सर्वेने जुदा कर्या. ॥ ५२ ॥ तेउमां सागर नामनो नानो पुत्र गुणवान् कलावान् सत्यवादी तथा जैनधर्ममां लीन चित्तवाळो हतो. ॥
॥ ५३ ॥ ते सागरने प्रिय बोलनारी अने पतिना चित्त प्रमाणे वर्तनारी सत्यवती नामनी वहाली

॥ ५४ ॥ अथ पद्मपुरः स्वामी । राजा पद्मरथाभिधः ॥ पद्मश्रीस्तस्य राज्ञी च । सुता पद्मावती
तथा ॥ ५५ ॥ अनेकगुणसंपन्ना । विद्ययेव सरस्वती ॥ क्रमेण यौवनं प्राप्ता । सुंदरी सा मनोहरा
॥ ५६ ॥ राज्ञान्यदा सभायाता । दृष्टा पद्मावतीसुता ॥ यौवनाद्वरयोग्या सा । साक्षाद्देवांगनोपमा
॥ ५७ ॥ राज्ञश्चिंता समुत्पन्ना । कस्य यच्छामि मे सुतां ॥ कुलशीलवयोदेहं । दृष्टव्यं वरलक्षणं
॥ ५८ ॥ अथ पद्मरथो राजा । स्वसुतागुणरंजितः ॥ कुमारचित्ररूपाणि । तस्याः सोऽदर्शयन्मुदा

---

स्त्री हती. ॥ ५४ ॥ हवे रत्नपुरमां पद्मरथ ( नामनो ) राजा ( राज्य करतो ) हतो, तेने पद्मश्री ( नामनी ) राणी, तथा पद्मावती ( नामनी ) पुत्री हती. ॥ ५५ ॥ अनेक गुणथी भरपूर, अने विद्याथी साक्षात सरस्वती जेवी ते मनोहर पुत्री अनुक्रमे यौवनावस्था पामी. ॥ ५६ ॥ एक दिवस यौवनथी वरयोग्य तथा साक्षात् देवांगनाजेवी पोतानी पुत्री पद्मावतीने सभामां आवेली राजाए जोइ. ॥ ५७ ॥ त्यारे राजाने चिंता उत्पन्न थइके हुं मारी पुत्री कोने आपुं? कारणके वरनां कुळ शील वय अने शरीर ( ए चारे ) जोवां जोइए. ॥ ५८ ॥ हवे पोतानी पुत्रीना गुणथी आनंदित थयेलो पद्मरथ राजा तेणीने जूदा जूदा कुमारोना रूपना चित्रपट देखाडवा ला-

॥ ५८ ॥ परं कस्यापि लावण्यं । पद्मावत्या न रोचते ॥ यथा स्निग्धनरः कुंभो । न भिद्यते जलादिह ॥ ६० ॥ एवं शतसहस्राणां । चित्राणि भूपजन्मिनां ॥ दर्शितानि परं तस्या । रज्यते न मनः क्वचित ॥ ६१ ॥ इति विज्ञाय भूनाथः । सुतादुःखेन दुःखितः ॥ राज्ञ्यादिपरिवारोऽपि । चिंताकांतोऽभवत्क्षणात ॥ ६२ ॥ शांतिनाथस्य यात्रार्थं । सूत्रधारः स सागरः ॥ सकलत्रः समित्रोऽथ । गतो रत्नपुरेऽन्यदा ॥ ६३ ॥ पूजयित्वा जिनं तत्र । यावत्स्तोत्रैः स्तवत्यसौ ॥ तावत्पद्मावतीकन्या ।

---

थया. ॥ ५९ ॥ पण पद्मावतीने कोइनुं पण लावण्य पसंद पडतु नहि, जेम बहु रीढो थयेलो घडो पाणीथी भांगतो नथी. ॥ ६० ॥ एवी रीते सेंकडो अने हजारो कुमारोनां चित्रो ( तेणीने ) देखाडवामां आव्यां. तो पण तेणीनुं मन कोइमां पण रंजित थयुं नहि. ॥ ६१ ॥ आ जाणीने पुत्रीना दुःखथी राजा दुःखी थयो, अने राणी विगेरे सघळो परिवार पण ते क्षणे चिंतातुर थयो. ॥ ६२ ॥ एक दिवस ते सागर सुतार पोतानी भार्या तथा मित्र सहित शांतिनाथ प्रभुनी यात्रा करवा रत्नपुर आव्यो. ॥ ६३ ॥ त्यां जिनेश्वर भगवाननी पूजा करीने स्तोत्रथी स्तुती करे छे, तेवामां ते पद्मावती कन्या ( पोतानी ) सखी सहित त्यां आवी. ॥ ६४ ॥ तेणीए पुरुषना द्व-

सखीयुक्ता समागता ॥ ६४ ॥ पुरुषद्वेषतः साथ । पुरुषान् जिनमंदिरात ॥ बहिर्निष्कासयामास ।
स्वसखीभिस्तदा द्रुतं ॥ ६५ ॥ भयाच्च पुरुषाः सर्वे । नष्टा यावद्दिशोदिशं ॥ सागरस्तु रहः स्थित्वा
। पश्यत्येव कुतूहलं ॥ ६६ ॥ तद्रूपमोहितश्चित्ते । सूत्रधारो व्यचिंतयत् ॥ किन्नरी नागकन्या किं
। विद्याधर्यथवा न्वियं ॥ ६७ ॥ एवंविधापि कन्येयं । कथं दोषेण दूषिता ॥ पुरुषद्वेषिणी जाता ।
गुणा दोषे निरर्थकाः ॥ ६८ ॥ यथा दिनं विना सूर्यं । विना दीपेन मंदिरं ॥ यथा कुलं विना
पुत्रं । तथा नाथं विना स्त्रियः ॥ ६९ ॥ एवं विचिंतयमानोऽसौ । सागरस्तत्र संस्थितः ॥ नमस्कृत्य

---

षथी पोतानी सखीओ पासे सघळा पुरुषोने जिनमंदिरनी बहार कढाव्या. ॥ ६५ ॥ सर्वे पुरुषो भ-
यथी चारे दिशामां नासी गया, पण सागर तो संताइने कुतुहल जोवा लाग्यो. ॥ ६६ ॥ (अने)
तेना रूपथी मोहित थइने ते सूत्रधार चिंतववा लाग्यो के आ कन्या कोइ किन्नरी हशे? नाग
कन्या हशे? के विद्याधरी हशे? ॥ ६७ ॥ आवी सुंदर पण ते केम दोषवाळी थइ हशे? ते पु-
रुषोनो द्वेष शा माटे करती हशे? खरेखर एक दोषथी सघळा गुणो निरर्थक थाय छे. ॥ ६८ ॥
जेम सूर्य विनानो दिवस, दीपक विनानुं मंदिर, पुत्र विनानुं कुळ तेम पति विनानी स्त्री शोभ-

जिनं शांतिं । तावत्सा तु गृहं गता ॥ १० ॥ पूजां कृत्वा जिनेंद्रस्य । संघपूजां विधाय च ॥ सागरः कृतकृत्योऽसौ । गतो निजगृहं ततः ॥ ११ ॥ तस्या रूपानुसारेण । विदधे शालभंजिका ॥ सागरेणात्र वत्सेयं । तेन कौतुकतः खलु ॥ १२ ॥ पुत्तल्याश्चेति वृत्तांतं । श्रुत्वा राजसुतोऽथ सः ॥ विह्वलीभूतचित्तो द्राक् । मेदिन्यां मूर्छितोऽपतत् ॥ १३ ॥ शीतोपचारतः प्राप्त-चैतन्ये राजनंदने ॥ रत्नसारः पुनर्दुःखी । पप्रछ मुनिपुंगवं ॥ १४ ॥ स्वामिन् कथं सुहृन्मेऽसौ । दृष्ट्वेमां पुत्तलीं खलु ॥ मूर्छया पतितो भूमौ । कथयाशु कृपानिधे ॥ १५ ॥ एतदाश्चर्यमस्माकं । कथयाशु महामुने ॥

---

ती नथी. ॥ ९ ॥ एवीरीते चिंतवतो सागर त्यां ऊभो छे, तेवामां ते कन्या शांतिनाथ प्रभुने नमस्कार करीने पोताने घेर गइ. ॥ १० ॥ त्यार पछी सागर पण जिनेश्वरनी तथा संघनी पूजा करीने कृतकृत्य थयो थको पोताने घेर गयो. ॥ ११ ॥ हे वत्स ! ते सागरे कौतुकथी ते कन्यानां रूपप्रमाणे आ पुतळी बनावी छे. ॥ १२ ॥ कुमार ते पुतळीनुं वृत्तांत सांभळीने विह्वल थयो थको पृथ्वीपर मूर्छा खाइने पड्यो. ॥ १३ ॥ शीतोपचारथी राजपुत्र सचेतन थतां रत्नसारे दुःखी थइने पुनः ते मुनिराजने पूछयुं, ॥ १४ ॥ हे कृपानिधि ! हे स्वामिन् ! मारो मित्र आ पुतळी जो-

संदेहं मम चित्तस्या—पाकुरु त्वं प्रसद्य प्रभोः ॥ ७६ ॥ तदोवाच मुनींद्रस्तु । सुधामधुरया गिरा ॥
शृणु वत्स यथातथ्यं । वृत्तांतं सुहृदस्तव ॥ ७७ ॥

यथास्मिन् भरतक्षेत्रे । देशे द्रविडनामनि ॥ नगर्याः खलु चंपायाः । समीपे चंपकं वनं ॥७८॥
चंपकाशोकपुन्नाग—लवंगागुरुचंदनैः ॥ नारिंगसहकारादि—वृक्षैस्तच ह्यलंकृतं ॥ ७९ ॥ तस्मिन् वने
सरः शुभ्र—निर्मलजलपूरितं ॥ अस्ति रचितसोपानं । पद्मिनीखंडमंडितं ॥ ८० ॥ हंसाश्च कलहं-

---

इने मूर्छाथी भूमीपर शामाटे पडी गयो ते कहो ? ॥ ७५ ॥ हे महामुनि ! आ आश्चर्य उपजावनारी वात अमोने कहो ? अने प्रसाद करीने मारा संशयनुं निराकरण करो. ॥ ७६ ॥ त्यारे ते मुनींद्र अमृतजेवी मधुर वाणीथी बोल्या हे वत्स ! तारा मित्रनो यथास्थित वृत्तांत सांभळ ? ॥७७॥

आ भरत क्षेत्रमां द्राविड नामना देशमां चंपा नगरीनी समीपमां चंपक नामनुं चंपक, अशोक, पुन्नाग लविंग, अगुरुचंदन, नारंग अने आम्र विगेरे वृक्षोथी शोभितुं वन छे. ॥ ७८—७९ ॥ ते वनमां सुंदर अने निर्मळ जळथी भरपूर, पगथीयाळुं तथा कमळना छोडथी शोभितुं थयेलुं एक सरोवर छे. ॥८०॥ त्यां हंस, कलहंस, चक्रवाक. बगलां, अने सारस विगेरे पक्षीओ क्रीडा करे छे. ॥८१॥

चित्र सार्थ १७

श्चाच । चक्रवाकबकास्तथा ॥ सारसप्रमुखाश्चान्ये । तत्र क्रीमंति पक्षिणः ॥ ७१ ॥ एकस्मिन् दिवसे तत्र । सार्थपः कोऽपि चागतः ॥ सरस्तटे तदा तेन । कृतं सार्थनिवेशनं ॥ ७२ ॥ स्नात्वा तेन तदा तत्र । जिनबिंबार्चनं कृतं ॥ भोजनावसरे प्राप्ते । चातिथिं स व्यलोकयत् ॥ ७३ ॥ सरःपालिं समारुह्य । स स्थितः शुभभावतः ॥ मुनिर्मासोपवास्येकः । पुण्यात्तत्रागतस्तदा ॥ ७४ ॥ प्रमोदमेदुरीभूय । सार्थेशो भावनान्वितः ॥ प्रासुकान्नं ददौ तस्मै । वाचंयमवराय सः ॥ ७५ ॥ वृक्षस्थहंसहंसीभ्यां । तदा दानानुमोदनं ॥ कृतं च शुभकर्मापि । ताभ्यां भावादुपार्जितं ॥७६॥ तस्मिन्

---

एक दिवसे त्यां कोइक सार्थपति आवी चड्यो, अने तेने किनारे सार्थनो पडाव नाख्यो. ॥ ॥ ७२ ॥ त्यां तेणे स्नान करीने जिनेश्वरनी मूर्तिनुं पूजन कर्युं. अने भोजननो अवसर थवाथी ते कोइ अतिथिनी राह जोवा लाग्यो. ॥ ७३ ॥ तळावनी पाळपर जेवो ते चडीने शुभ भावथी ऊभो छे, तेवामां पुण्यना योगथी एक मासोपवासी मुनी आवी पहोंच्या. ॥ ७४ ॥ आनंदथी पुलकित थइने ते सार्थपतिए शुभ भावथी ते उत्तम मुनिने प्रासुक आहार वहोराव्यो. ॥ ७५ ॥ ते वृक्षपर रहेलां एक हंसनां जोडांए ते दाननुं अनुमोदन कर्युं. अने ते भावथी शुभ कर्म पण

वने विटप्येको । गरिष्ठोऽस्ति फलान्वितः ॥ आसन्नप्रसवा हंसी । तत्र नीडं चकार सा ॥ ८७ ॥
क्रमात्तस्याश्च संजातौ । युग्मरूपौ च बालकौ ॥ परमस्नेहसंयुक्तौ । पोष्यमाणावहर्निशं ॥८८॥ ए-
कदाथ वने तस्मिन् । वंशघर्षणतः क्षणात ॥ दावानलः समुत्पन्नः । करालः सर्वदाहकः ॥ ८९ ॥
वह्नितापाकुलो हंसो । हंसिनींप्रत्यजल्पत ॥ रक्षेऽहं बालकावेतौ । व्रज त्वं जलहेतवे ॥९०॥ ज-
ल्पते हंसिनी ताव--दहं रक्षामि बालकौ ॥ अपत्यपालने माता । समर्थैव पिता न हि ॥ ९१ ॥

---

त्यां उपार्जन कर्युं. ॥ ८६ ॥ ते वनमां फळथी भरपूर एक महावडनुं झाड हतुं, त्यां ते हंसीए गर्भवती थवाथी माळो बांध्यो. ॥ ८७ ॥ अनुक्रमे तेणीए परमस्नेही अने हंमेशां पोषातां बे बच्चांनो जोडीरूपे जन्म आप्यो. ॥ ८८ ॥ हवे एक दिवस ते वनमां वांसना परस्पर घसाराथी भयंकर अने सर्वने बाळनारो दावानल उत्पन्न थयो. ॥ ८९ ॥ हवे अग्निना तापथी आकुळ थयेलां हंसे हंसीने कह्युं के हुं आ बाळकनुं रक्षण करुं छुं, तुं जळ लेवा जा ? ॥ ९० ॥ त्यारे हंसी बोली हुं बाळकोनुं रक्षण करुं छुं, कारणके संततिनुं पालन करवाने माताज समर्थ होय छे, पण पिता थता नथी ॥ ९१ ॥ हंसीना एम कहेवाथी स्नेहाकुळ चित्तवाळो हंस जळ लेवा गयो, अने

हंस्येत्युक्तो गतो हंसः । स्नेहाकुलितमानसः ॥ सरसश्च जलं चंच्वा । भृत्वायाति स यावता ॥९२॥
दावानलाकुला हंसी । तावदेवं व्यचिंतयत् ॥ निःस्नेही कातरो हंसो । मुक्त्वा मां स गतः क्वचि-
त् ॥ ९३ ॥ तन्नूनं पुरुषाः सर्वे । निर्दया निर्घृणा अपि ॥ पापिष्ठानामतस्तेषां । विलोक्यं नापि
सन्मुखं ॥ ९४ ॥ अपत्यस्नेहबद्धा सा । दग्ध्वा दावानले तदा ॥ धर्मानुमोदनेनाशु । संप्राप्ता
मानुषं भवं ॥ ९५ ॥ पुरे रत्नपुरे भूत्वा । पद्मरथनृपस्य सा ॥ पद्मश्रीकुक्षिसंभूता । जाता पद्माव-
ती सुता ॥ ९६ ॥ जलमादाय हंसोऽथ । यावदागाच्च पादपे ॥ तावद्धंसी मृता तेन । दृष्टा बाल-

जेटलामां तळावमांथी पाणीनी चांच भरीने ते आवे छे, तेटलामां दावानळथी आकुळ थयेली हंसी चिंतववा लागी के स्नेह रहित अने बिकण हंस मने मूकीने क्यांक चाल्यो गयो. ॥९२–९३॥ तेथी खरेखर सघळा पुरुषो निर्दय अने कृतघ्नी होय छे. माटे एवा पापिष्ठोनी सामुं पण जोवुं न-हि. ॥ ९४ ॥ (एम विचार करती) ते हंसी बच्चांना स्नेहमां लुब्ध थइ थकी ते दावानळमां ब-ळीने धर्मनां अनुमोदनथी तुरत मनुष्यपणे उत्पन्न थइ. ॥ ९५ ॥ पद्मपुरमां पद्मरथ राजानी रा-णी पद्मश्रीनी कुक्षीए पद्मावती नामनी पुत्रीपणे ते उत्पन्न थइ. ॥ ९६ ॥ हवे जेवामां ते हंस

कसंयुता ॥ ९७ ॥ दुस्सहं हि प्रियामृत्यु । किं पुनः सुतसंयुतं ॥ स्नेहात्तदा स हंसोऽप । हृदयः स्फोटतो मृतः ॥ ९८ ॥ दानानुमोदनात्पुण्यं । संचितं तेन यत्तदा ॥ तेन पुण्यप्रभावेणा—ज्ञवस्त्वं चित्रसेनकः ॥ ९९ ॥ दृष्टे संबंधिनि जीवो । मोहकर्मानुज्ञावतः ॥ पूर्वाज्यासानुसारेण । मनश्चेष्टां प्रकुर्वते ॥ १०० ॥ श्रुत्वा पूर्वभवस्येति । वृत्तांतं नृपजन्मिनः ॥ जाता जातिस्मृतिस्तस्य । मुनेर्वचनमात्रतः १ ॥ करामलकवत्सर्वं । पश्यन् पूर्वज्ञवं निजं ॥ प्रमोदाच्चित्रसेनस्तं । ववंदे मु-

---

पण पाणी लइने कांठापर आवे छे, तेवामां त्यां तेणे बच्चांज सहित हंसीने मरेली जोइ. ॥ ॥ ९७ ॥ प्रियानुं मरण दुःसह होय छे, तो पछी पुत्रसाथेनी तो वातज शी? ते हंस पण स्नेहने लीधे हृदयस्फोटथी मरण पाम्यो. ॥ ९८ ॥ तेणे दाननां अनुमोदनथी ते समये जे पुण्य उपार्ज्युं, ते पुण्यथी हे चित्रसेन ते तुं थयो. ॥ ९९ ॥ संबंधिजीवने देखतां मोहिनीकर्मनां अनुज्ञावथी तथा पूर्वना अभ्यासथी मनचेष्टा पण तेवीज थाय छे. ॥ १०० ॥ ते कुमारने पोताना पूर्वज्ञवनो वृत्तांत सांभळीने मुनिना वचनमात्रथी जातिस्मरणज्ञान उत्पन्न थयुं. ॥ १ ॥ करामलकपेठे पोतानो पुर्वज्ञव जोतो चित्रसेन आनंदथी ते मुनीराजने नम्यो. ॥ २ ॥ हवे कु-

निपुंगवं ॥ २ ॥ सोऽवक् मुने हि सत्योऽयं । वृत्तांतो भवतोदितः ॥ परं वद कथं साय । मिलि-
ष्यति मम प्रिया ॥ ३ ॥ मुनिरूचेऽधुना सा तु । नरद्वेषिणी वर्तते ॥ स्त्रीणां स्तुतिपरा नित्यं ।
पुंसां निंदापरायणा ॥ ४ ॥ कुमारोऽवक् मुने पुंसां । निंदायाः कारणं किमु ॥ मुनिरूचे च पूर्वोक्त
—वृत्तांतो ह्यत्र कारणं ॥ ५ ॥ दवाग्नितापिता हंसी । तदैवं सा व्यचिंतयत् ॥ त्यक्त्वा निःस्नेह
तोऽपत्ये । नूनं हंसः पलायितः ॥ ६ ॥ तेन वैरेण सा कन्या । नरद्वेषिणी वर्तते ॥ मातापितरौ
तस्याश्च । संतापं वहतो हृदि ॥ ७ ॥ पूर्वभवस्य वृत्तांतं । परमालिख्य पट्टके ॥ दर्शय त्वं द्रुतं त-

---

मार बोल्यो हे मुनिराज ! आपे कहेली हकीकत सत्य छे, परंतु हवे ते मारी प्रिया मने केवी-
रीते मळशे ते कहो ? ॥ ३ ॥ त्यारे मुनी बोल्या हमणा तो ते नरद्वेषिणी छे, हमेशां ते स्त्रीओ-
नी स्तुति करे छे, अने पुरुषोनी निंदा करे छे. ॥ ४ ॥ कुमार बोल्यो हे मुनिराज ! तेणीने पुरु-
षोनी निंदा करवानुं शु कारण ? त्यारे मुनि बोल्या पूर्वे कहेलो वृत्तांतज अहिं कारणभूत छे. ॥
॥ ५ ॥ ते समये दावानळथी बळती हंसी चिंतववा लागी के खरेखर निःस्नेही हंस बच्चांने मूकीने
क्यांक भागी गयो, ॥ ६ ॥ ते वैरथी ते कन्या नरद्वेषिणी थइ छे, अने तेथी तेना मावाप पण

स्या । यथा त्वां परिणेष्यति ॥ ८ ॥ एवंविधं च वृत्तांतं । श्रुत्वा कर्णामृतोपमं ॥ हृष्टचित्तः कुमारोऽपि । मुनिं नत्वाग्रतोऽचलत ॥ ९ ॥ कुमारो मंत्रिपुत्रं तं । जगाद सुहृदोत्तमं ॥ तत्प्राप्त्यर्थमथो भ्रात—स्त्वमुपायं द्रुतं कुरु ॥ १० ॥ रत्नसारस्तदा प्रोचे । कुमार शृणु मद्वचः ॥ यावो रत्नपुरे पूर्वं । विधास्येऽहं शुभं ततः ॥ ११ ॥ निश्चित्येति हृदो मध्ये । प्रस्थितौ तत्पुरंप्रति ॥ अनेकाश्चर्यसंपूर्णां । पश्यंतावननीं पथि ॥ १२ ॥ कियद्भिर्दिवसैस्तौ च । प्राप्तौ रत्नपुरे क्रमात ॥ पश्यंतौ परितो वापी—

---

हृदयथी दुःखी छे. ॥ ७ ॥ हवे तेणीने तुं तारा पूर्वभवनो वृत्तांत चित्रपटमां आलेखी बताव? के जेथी ते तुरत तने परणशे. ॥ ८ ॥ एवी रीतनुं कर्णने अमृतसमान ते वृत्तांत सांभळी हर्षित थयो थको ते कुमार मुनिने नमी आगळ चाल्यो. ॥ ९ ॥ हवे कुमारे पोताना उत्तम मित्र एवा मंत्रिपुत्रने कह्युं के हे भाइ! तेणीने मेळववामाटे हवे तुं तुरत उपाय कर? ॥ १० ॥ रत्नसार बोल्यो हे कुमार! हुं कहुं ते सांभळ? प्रथम आपणे रत्नपुर जइए, त्यां हुं सर्व योग्य करीश. ॥ ११ ॥ एवीरीते निश्चय करीने ते बन्ने अनेक आश्चर्यथी भरेली पृथ्वी जोता जोता रत्नपुरतरफ आगळ चाल्या. ॥ १२ ॥ अनुक्रमे केटलेक दिवसे कूप आराम विगेरे कौतुको जोता तेओ रत्नपुर

कूपारामादिकौतुकं ॥ १३ ॥ एवं नानाविधाश्चर्य—व्रजालिं क्रमतोऽथ तौ ॥ पश्यंतौ च तदा प्राप्तौ । गोपुरद्वारसन्निधौ ॥ १४ ॥ धनंजयाख्ययक्षस्य । मंदिरे तौ समागतौ ॥ संध्यायाः समये सुप्तौ । तत्रैवैकत्र कोणके ॥ १५ ॥ तस्यां कृष्णचतुर्दश्यां । निशीथे तत्र मंदिरे ॥ मिलिता भूतवेताला । राक्षसाः किन्नरा अपि ॥ १६ ॥ मासे मासे च सर्वे ते । मिलित्वा तत्र मंदिरे ॥ गीतावाद्ययुतं नृत्यं । हृष्टाः कुर्वंति सर्वदा ॥ १७ ॥ कुमारश्चित्रसेनोऽथ । मृदंगध्वनिजागृतः ॥ दृष्ट्वा कुतूहलं तच्च । विस्मितो निजचेतसि ॥ १८ ॥ केऽपि वीणाः समादाय । वादयंति मनोहरं ॥ नृत्यं तथैव

---

पासे आवी पहोंच्या, ॥ १३ ॥ एवीरीते नानाप्रकारनां आश्चर्य जोता तेओ शहेरना दरवाजा पासे आवी पहोंच्या. ॥ १४ ॥ त्यां धनंजय नामना यक्षना मंदिरमां तेओ गया, अने सांज पडी जवाथी त्यांज एक खुणामां बन्ने सूइ रह्या. ॥ १५ ॥ ते दिवसे काळी चौदश होवाथी मंदिरमां रात्रीए भूत वेताल राक्षस अने किन्नर विगेरे भेगा थया. ॥ १६ ॥ दरमहिने तेओ सघळा ते मंदिरमां भेगा थइने गीत वाजित्र सहित नृत्य करता हता. ॥ १७ ॥ चित्रसेनकुमार वाजित्रना स्वरथी जागीने आ कुतुहल जोइ पोताना चित्तमां आश्चर्य पाम्यो. ॥ १८ ॥ त्यां केटलाक वीणा

तत्राथ । केऽपि कुर्वंति सुंदरं ॥ १९ ॥ कौतुकाक्षिप्तचित्तोऽथ । कुमारोऽप्यतिसाहसात् ॥ करवालं समादाय । ययौ तेषां स संसदि ॥ २० ॥ तदा सर्वे च ते देवाः । पश्यंति विस्मिताश्च तं ॥ कोऽयं मनोहराकारः । पृच्छंतीति परस्परं ॥ २१ ॥ धनंजयस्तदाचख्यौ । मंदिरे मेऽतिथिरयं ॥ अस्यातिथेयं कर्तव्य—मेतदाचरणं सतां ॥ २२ ॥ यक्षस्येति वचः श्रुत्वा । समयज्ञः कुमारराट् ॥ योजितांज-लिरुच्चाय । वचनं चेति सोऽब्रवीत् ॥ २३ ॥ अद्य मे सफलं जन्म । अद्य मे सफला क्रिया ॥ अद्य

---

लइने मनोहर वाजित्र वगाडता हता, तो केटलाएक सुंदर नृत्य करता हता. ॥ १९ ॥ कौतुकयुक्तचित्तवाळो कुमार पण अतिसाहसथी तरवार लइने तेओनी मंडळीमां गयो, ॥ २० ॥ त्यारे सघळा देवो आश्चर्यथी तेने जोवा लाग्या, अने आ मनोहर पुरुष कोण छे ? एम परस्पर पूछवा लाग्या. ॥ २१ ॥ त्यारे धनंजये कह्युं ए पुरुष मारा मंदिरमां अतिथि छे, माटे आपणे तेनुं आतिथ्य करवुं जोइए, ( कारणके ) एज सारुं पुरुषोनुं लक्षण छे. ॥ २२ ॥ यक्षनुं आ वचन सांभळी समयनो जाणकार कुमार पण अंजली जोडी उभो थइ नीचे प्रमाणे वचन बोल्यो, ॥२३॥ आज मारो जन्म सफळ थयो, आज मारी क्रिया सफळ थइ, आज मारी वाणी सफळ थइ के

मे सफला वाचो । यज्जातं तव दर्शनं ॥ २४ ॥ विनयात्तस्य संतुष्टो । हृष्टो यक्षस्तमब्रवीत ॥ मद्व-
चसः प्रभावेण । त्वं युद्धे विजयी भव ॥ २५ ॥ एवं तस्य वरं लब्ध्वा । कुमारो हृष्टमानसः ॥ कृ-
तार्थं मन्यमानः स्व—मागतो मित्रसन्निधौ ॥ २७ ॥ रत्नसाराय तेनाथं । वृत्तांतोऽरं निवेदितः ॥ न
हि मित्रवरस्याग्रे । गोप्यं भवति किंचन ॥ २९ ॥ प्रभाते चाथ संजाते । चित्रसेनकुमारराट् ॥
प्राप्तोऽथ सह मित्रेण । पुरमध्ये चतुष्पथे ॥ ३० ॥ तस्मिन्नवसरे तत्र । राजा पद्मरथः पुरे ॥ सु-
ताविवाहकार्यार्थी । पटहोद्‌घोषणां व्यधात ॥ ३१ ॥ यः कोऽपि पुरुषद्वेषं । सुताया मम स्फेटयेत ॥

---

( जे दिवसे ) तारुं दर्शन थयुं. ॥ २४ ॥ तेना विनयथी संतुष्ट थयेला ते यक्षे हर्षथी तेने कह्युं के
मारा वचनथी तुं युद्धमां विजयी था ? ॥ २५ ॥ एवीरीते तेनुं वरदान मेळवीने आनंदित चित्त-
वाळो कुमार पोताने कृतार्थ मानतो थको मित्रनी पासे आव्यो. ॥ २६ ॥ त्यां तेणे रत्नसारने बधी
हकीकत तुरत जणावी, कारणके उत्तम मित्र पासे कंइ पण छूपाववानुं होतुं नथी. ॥ २७ ॥ हवे
सवार थतां चित्रसेन कुमार पोताना मित्रसहित शहेरमां चौटामध्ये आव्यो. ॥ ३० ॥ ते समये
शहेरमां पद्मरथ राजा पोतानी पुत्रीना विवाहमाटे पटह वगडावतो हतो के ॥ ३१ ॥ जे कोइ

अर्धराज्ययुतां पुत्रीं । तस्मै दास्यामि निश्चितं ॥ ३२ ॥ इति ज्ञात्वा कुमारेण । स्मृत्वा तद् ज्ञानिनो वचः ॥ गत्वा चित्रकरस्याग्रे । पट्टश्चित्रापितो वरः ॥ ३३ ॥ वांछितार्था हि सिध्यंति । नृणां पुण्योदये सति ॥ विचिंत्येति कुमारोऽसौ । मानसे हर्षमाप्तवान् ॥ ३५ ॥ रत्नसारोऽथ तं पट्टं । गृहीत्वा नगरे ततः ॥ भ्रमन् गीतविनोदेन । रंजयामास नागरान् ॥ ३६ ॥ तद्गीतचित्रचारुत्व-वार्ताथो विस्तृता पुरे ॥ दर्शनोत्कंठिता जाता । तस्य पद्मावती तदा ॥ ३७ ॥ चित्रपट्टं तदा स्नेहा-त्सानाय्याथ व्यलोकयत् ॥ दर्शनेन कुमारस्य । साथ जातानुरागिणी ॥ ३८ ॥ दृष्टं तत्र तया सर्वं

---

मारी पुत्रीना पुरुषद्वेषनो नाश करशे तेने खरेखर अर्ध राज्य सहित मारी पुत्री परणावीश. ॥३२॥ आ जाणी कुमारे ते ज्ञानिनु वचन याद करी ( एक ) चित्रकार पासे जइ उत्तम चित्रपट चितराव्यो. ॥ ३३ ॥ मनुष्योनो पुण्योदय होते छते सर्व वांछित सिद्ध थाय छे, एम चिंतवी कुमार मनमां हर्ष पाम्यो. ॥ ३५ ॥ त्यारबाद रत्नसार ते चित्रपट लइने नगरमां भमतां थकां गीतविनोदथी लोकोने रंजित करवा लाग्यो. ॥ ३६ ॥ ते गीत अने चित्रनां सुंदरपणानी वार्ता आखा गाममां फेलाइ गइ, ( तेथी ) पद्मावती पण ते जोवाने उत्कंठित थइ. ॥ ३७ ॥ ते चित्रपट

। काननादिकमुत्तमं ॥ अनेकपंकजाकीर्णं । सरश्चापि मनोहरं ॥ ३९ ॥ दृष्टोऽथ वटवृक्षोऽपि । स्वीयनीडेन संयुतः ॥ दृष्टं च मिथुनं तत्र । सापत्यं हंसीहंसयोः ॥ ४१ ॥ तत्र दावानले तस्मां । सबाळां तां मरालिकां ॥ ददर्श मुक्त्वा गछंतं । हंसं पानीयहेतवे ॥ ४२ ॥ चंचुगृहीतपानीय—माग छंतं मरालकं ॥ तत्र चित्रपटे साथ । ददर्श मुदिताशया ॥ ४३ ॥ मृतां बालकसयुक्तां । मराळीं च तथैव सा ॥ दग्धां दवाग्निना तत्र । संपातितां व्यलोकयत् ॥ ४४ ॥ प्रियापत्यवियोगार्त्तं । पतंतं झंपयानले ॥ मरालमपि सा दृष्ट्वा । ह्याश्चर्यं भृशमाप च ॥ ४५ ॥ एवं चित्रपटं दृष्ट्वा । जातजा

---

तेणीए स्नेहथी मंगावी जोयो, अने तेमां कुमारने जोइने ते अनुरागवाळी थइ. ॥ ३८ ॥ ते ( पटमां ) तेणीए उत्तम वन, अने अनेक कमळोथी भरपूर पूर्वनुं मनोहर सरोवर पण जोयुं. ॥ ३९ ॥ पोताना माळावाळुं वडनुं वृक्ष, तथा बच्चांवाळुं हंसनुं जोडुं पण जोयुं. ॥ ४१ ॥ तेमां दावानळथी बळती बच्चां सहित हंसीने मूकी पाणीमाटे जता हंसने जोयो, ॥ ४२ ॥ वळी आनंदित मुखवाळी पद्मावतीए ते चित्रपटमां चांचमां पाणी लइने आवता हंसने जोयो. ॥ ४३ ॥ तेमज बच्चां सहित अग्निथी बळीने मरण पामेली पडेली हंसीने पण जोइ. ॥ ४४ ॥ वळी प्रिया

तिस्मृतिस्तदा ॥ मूर्छया चपलं साथ । पतिता पृथिवीतले ॥ ४६ ॥ शीतोपचारतस्तूर्णं । सखीभिः प्रगुणीकृता ॥ साचिंतयन्मृतो हंसो । नूनं मम वियोगतः ॥ ४६ ॥ पुरुषेषु मुधा द्वेषो । मूढयात्र कृतो मया ॥ एष चित्रधरो नूनं । जीवो हंसस्य नान्यथा ॥ ४७ ॥ सखीभिः सह वार्ता च । यावदेवं करोति सा ॥ तावत्कुमारः कुत्रापि । गतो मित्रसमन्वितः ॥ ४८ ॥ क्षणांतरेऽथ सा यात्र— त्पश्यतीयं गवाक्षतः ॥ तावच्चित्रधरं तं सा । पश्यति नो पथि ध्रुवं ॥ ४९ ॥ तदा जगाद सा क-

---

अने बच्चांना वियोगथी अग्निमां पडी आपघात करता हंसने पण जोइने आश्चर्य पामी. ॥ ४५ ॥ एवीरीतनुं चित्रपट जोइने जातिस्मरण थयुं छे जेणीने एवी ते कन्या मूर्छाथी तुरत भूमीपर पडी गइ. ॥ ४६ ॥ शीतळ उपचारथी सावधान थयेली एवी ते चिंतववा लागी के खरेखर मारा वियोगथी हंस मरण पाम्यो छे. ॥ ४६ ॥ अरेरे में मूर्खीए पुरुषो प्रत्ये वृथा द्वेष कर्यो ! आ चित्रधारक पुरुष खरेखर हंसनो जीव छे. ॥४७॥ जेटलामां ते पोतानी सखीओ साथे आ प्रमाणे वार्ता करे छे, तेवामां कुमार पण पोताना मित्र सहित क्यांक चाल्यो गयो. ॥४८॥ एक क्षण पछी ज्यारे तेणीए गोखनीबहार जोयुं, त्यारे रस्तामां ते चित्रधारकने जोयो नहि. ॥४९॥ त्यारे ते कन्या बोली के हे सखी

न्या । गृहीत्वा मम मानसं ॥ गतं प्रियतमं मे तं । सख्यश्चानयत द्रुतं ॥ ५० ॥ एवं विलप्यमाना सा । भर्तुर्दुःखेन दुःखिता ॥ सखीभिर्मधुरैर्वाक्यैः । प्रबोध्याश्वासिता भृशं ॥ ५१ ॥ अथ पद्मरथो नृपः । स स्वयंवरमंडपं ॥ विधायाकारयामास । कुमारांश्च महीभुजां ॥ ५२ ॥ अथो नृपकुमारास्ते । सशृंगारा मनोहराः ॥ त्वरमाणा इवानंगा—स्पद्मावत्याः स्वयंवरे ॥ ५३ ॥ चतुरंगचमूयुक्ताः । प्राप्ता रत्नपुरे वरे ॥ कुतूहलानि पश्यंतः । स्थिताश्चोद्यानभूमिषु ॥ ५४ ॥ मंडपे स्फटिकस्तंभाः । शालभंजीमनोहराः ॥ चित्रिताः पंचवर्णैश्च । शोभंते तत्र भूरयः ॥ ५५ ॥ मंडपस्याद-

---

मारुं मन ग्रहीने गयेला मारा प्रियतमने तुरत लइ आवो ? ॥ ५० ॥ एवीरीते विलाप करती तथा पतिना वियोगथी दुःखी थती एवी ते कन्याने सखीओए मधुर वाक्योथी समजावी शांत पाडी. ॥ ५१ ॥ हवे ते पद्मरथ राजाए स्वयंवरमंडप रचीने सघळा राजकुमारोने बोलाव्या. ॥ ५२ ॥ ते राजकुमारो पण मनोहर शृंगार पहेरी, चतुरंगी सैन्ययुक्त कामदेवथी खेंचायलानी पेठे पद्मावतीना स्वयंवरमां रत्नपुरमां आव्या, अने त्यां अनेक कुतूहलो जोता उद्यानमां रह्या. ॥ ५३–५४ ॥ ते मंडपमां पुतळीओथी सुशोभित थयेला अने पांच वर्णथी चितरेला स्फटिकना अनेक स्तंभो शो-

द्भुतां शोभां । दृष्ट्वा भूपकुमारकाः ॥ अतीवानंदसंदोहं । संप्रापुः क्षणतस्तदा ॥ ५६ ॥ अथ पद्मरथो राजा । सामग्रीं प्रविधाय सः ॥ चारुसिंहासनश्रेणिं । मंडयामास मंडपे ॥ ५७ ॥ कर्पूरागुरुकस्तुरी—धूपवासैश्च वासितः ॥ नानाविधैः सुपुष्पैश्च । मंडपो मंडितस्तदा ॥ ५८ ॥ कुमाराः सकलास्तत्रो—पाविशन्मंडपे तदा ॥ सशृंगाराः सुशोभाढ्या । आसनेषु यथोचितं ॥ ६० ॥ नानाविधानि नृत्यानि । गीतवाद्ययुतानि च ॥ मनांस्यत्र कुमाराणां । मंडपे रंजयंत्यलं ॥ ६१ ॥ अथोत्थाय नृपस्तत्र । कुमारानित्यवक् तदा ॥ वज्रसारमिमं चापं । मामकीनं क्रमागतं ॥ ६२ ॥ उत्पा-

---

मता हता. ॥ ५५ ॥ राजकुमारो ते मंडपनी अद्भुत शोभा जोइने क्षणवार बहु आनंद पामता हता. ॥ ५६ ॥ हवे पद्मरथ राजाए पण सघळी सामग्री तैयार करीने मंडपमां मनोहर सिंहासनोनी श्रेणी मंडावी. ॥ ५७ ॥ वळी ते मंडप कपूर अगुरुचंदन अने कस्तूरी विगेरेना धूपथी सुगंधित, अने नानाप्रकारनां पुष्पोथी सुशोभित बनाव्यो. ॥ ५८ ॥ त्यारपछी उत्तम शृंगारवाळा तथा मनोहर एवा सघळा राजकुमारो मंडपमां यथोचित स्थानके बेठा. ॥ ६० ॥ ते समये जातजातनां गीत अने वाजित्रथी युक्त नृत्यो ते कुमारोनां मन रंजित करतां हतां. ॥ ६१ ॥ हवे राजा

ष्य यो हि वो मध्याद् । बाणमारोपयिष्यति ॥ तत्रेयं खलु मे पुत्री । तं नूनं परिणेष्यति ॥ ६३ ॥
युग्मं ॥ इति श्रुत्वा कुमारास्ते । सगर्वा जगदुर्मिथः ॥ धनुर्वेदविदां नो हि । कार्यमेतन्न दुष्करं
॥ ६४ ॥ अथ पद्मावती कन्या । सर्वशृंगारभूषिता ॥ सखीगणसमायुक्ता । समागान्मंडपे तदा ॥
॥ ६५ ॥ स्वर्णकंबां समादाय । वेत्रिणी चलिताग्रतः ॥ सद्यस्कवरपुष्पाणां । वरमालायुता करे ॥
॥ ६६ ॥ तांबूलं यच्छति कापि । दासी तस्यै मनोहरं ॥ कापि वीजयति वातं । सुगंधितालवृंततः ॥

---

पोते उठी कुमारो प्रत्ये बोल्यो के मारा वंशमां अनुक्रमे आवेलुं वज्रसार नामनुं आ धनुष्य जे कोइ वच्चेथी उपाडी तेना पर बाण चमावशे तेज्ज आ मारी पुत्री परणशे. ॥ ६२–६३ ॥ आ सांभळीने ते गर्विष्ट कुमारो परस्पर कहेवा लाग्या के धनुर्वेद जाणनाराउने आ कार्य कांइ दुष्कर नथी. ॥६४॥ एटलामां सर्व शृंगारथी शोभिती एवी पद्मावती कन्या पोतानी सखीउना समूह साथे मंडपमां आवी. ॥ ६५ ॥ तेणीनी आगळ सोनानी छडी हाथमां लइ तथा बीजा हाथमां उत्तम पुष्पोनी वरमाळा लइ प्रतिहारी चालती हती, ॥ ६६ ॥ कोइक दासी तेणीने मनोहर तांबुल आपती हती, ( अने ) कोइक दासी सुगंधी पंखाथी पवन वींजती हती. ॥ ६७ ॥ जेम पृथ्वीपर

॥ ६७ ॥ करोति कौमुदी द्योतं । यथा हि महिमंम्त्ले ॥ तथा सा द्योतयामास । स्वकांत्याखिलमं-
म्पं ॥ ६८ ॥ मंडपस्थं धनुर्दृष्ट्वा । सा हृदि चेत्यचिंतयत ॥ बाणमत्र प्रियो मे स । कथमारोपयि-
ष्यति ॥ ६९ ॥ एवं चिंताकुला यावत् । सा स्थिता मंम्पे भृशं ॥ तावत्सख्या मुखे धृत्वा । कंबु-
र्नादेन पूरितः ॥ ७० ॥ स्वासनेषु कुमारास्ते । सावधानास्तदा स्थिताः ॥ वेत्रिणी वदति तेषां ।
कुमाराणामथो मुदा ॥ ७१ ॥ सर्वे शूराश्च गंभीरा । यूयं स्थाथ कुमारकाः ॥ कन्यावरणवांछा चे-
द्बाणमारोपयंत्वरं ॥ ७२ ॥ लाटाधिपः समुत्तस्थौ । कन्यावरणवांछया ॥ तदोत्तरीयं संवृत्य । बाहुसं-

---

कौमुदी उद्योत करे छे, तेवीरीते तेणीए पोतानी कांतिथी आखा मंम्पने प्रकाशित कर्यो. ॥
॥ ६८ ॥ ते मंडपमां पडेला धनुष्यने जोइने हृदयमां चिंतववा लागी के मारो प्रियतम आ बाण
केम आरोपशे ? ॥ ६९ ॥ एवीरीते चिंतातुर थयेली ते जेटलामां मंडपमां उभी छे तेटलामां तेनी
सखीए मुखमां कंबु नांखीने अवाज कर्यो. ॥ ७० ॥ ( ते सांभळी ) सघळा कुमारो पोतपोतानां
आसनपर सावधान थइने बेठा, त्यारे प्रातिहारी ते कुमारोने कहेवा लागी, ॥ ७१ ॥ हे कुमारो
तमो सर्वे शूरा अने गंभीर छो, पण जो आ कन्या वरवानी इच्छा होय तो आ बाण तरत आरोपो ?

वाहनापरः ॥ १२ ॥ यावच्च धनुषोऽग्रेऽसौ । समायाति मुदाकुलः ॥ तावद्ददर्श नो चापं । जन्मांध
इव नृपतिः ॥ १४ ॥ हसिताथ सभा सर्वा । दत्ततालाः परस्परं ॥ लज्जानम्रीमुखः सोऽपि । सिंहा-
सनमुपाययौ ॥ १५ ॥ कर्णाटेशः समुत्थाय । ततो भुजबलान्वितः ॥ यावद्गृह्णाति कोदंडं । क-
न्यावरणलंपटः ॥ १६ ॥ तावत्कृतफणाटोपं । सर्पं दृष्ट्वा भयार्दितः ॥ हसितश्च सभालोकै—द्रुतं
स्वस्थानमासदत् ॥ १७ ॥ युग्मं ॥ काश्मीराधिपतिस्ताव—दुत्थितः सपराक्रमः ॥ वहन् गर्वं हृदोम-

---

॥ १२ ॥ त्यारे लाटदेशनो राजा भेंठ बांधीने हाथ ठोकतो थको कन्या वरवानी इच्छाथी उभो
थयो. ॥ १३ ॥ हर्षयुक्त ते जेवो धनुषनी पासे आव्यो तेटलामां जन्मांधनी पेठे तेणे धनुष जो-
युं नहि. ॥ १४ ॥ ( आ जोइ ) आखी सभा हसवा लागी, अने परस्पर तालीओ देवा लागी,
अने ते राजा पण लज्जाथी नीचा मुखवालो थयो थको पोताना सिंहासनपर आव्यो. ॥ १५ ॥
त्यारबाद भुजाबळवाळो कर्णाट देशनो राजा कन्या वरवानी इच्छावाळो जेटलामां धनुष्य उपाड-
वा जाय छे तेटलामां फणाटोप धरेला सर्पने जोइने भयभीत थयो थको, तथा सभासदोथी
हसानो एवो ते तुरत पोताने स्थानके गयो. ॥ १६—१७ ॥ त्यारपछी महापराक्रमी, हृदयमां गर्व

ध्ये । स्पर्शन् श्मश्रूणि पाणिना ॥ ७८ ॥ अहंकारयुतो ह्येवं । यावद्व्रजति सोऽग्रतः ॥ देवताधिष्ठितं तेन । दृष्टं ज्वालाकुलं धनुः ॥ ७९ ॥ भीतोऽसौ वलितः पश्चा- द्धस्यमानः सभास्थितैः ॥ जनैर्लज्जाविनम्रास्यो । निविष्टो निजमासनं ॥ ८० ॥ तदा पद्मरथो राजा । संजातश्चिंतयातुरः ॥ व्यचिंतयच्च को ह्येनां । प्रतिज्ञां पूरयिष्यति ॥ ८१ ॥ कुमारी चिंतयामास । न दृष्टोऽत्र प्रियो मया ॥ व्यर्थतां च गतो नूनं । मंडपाडंबरोऽप्ययं ॥ ८२ ॥ गुप्तवेषधरस्तावद् । दृष्टो मित्रयुतः पतिः ॥ रो-

---

धरतो तथा मूछपर हाथ मूकतो काश्मीर देशनो राजा उभो थयो. ॥ ७८ ॥ जेटलामां ते अहंकार सहित आगळ चाले छे तेटलामां तेणे ते धनुष्य देवोथी अधिष्टित थयेलुं तथा ज्वाळाथी भरपूर जोयुं ॥ ७९ ॥ तेथी ते भयभीत थइने सभासदोथी हसातो तथा लज्जाथी अधोमुख थयो थको पाछो वळी पोताना आसनपर बेठो ॥ ८० ॥ त्यारे पद्मरथ राजा चिंतातुर थयो थको चिंतववा लाग्यो के आ प्रतिज्ञा कोण पूरी करशे ? ॥ ८१ ॥ कुमारी पण चिंतववा लागी के मारो प्रियतम अहिं देखायो नहि तेथी खरेखर आ मंडप विगेरेनो आडंबर व्यर्थ गयो. ॥ ८२ ॥ तेवामां तेणे पोताना पतिने मित्र सहित गुप्त वेषमां उभेलो जोइने अतीवहर्षथी ते पुलकित थइ.

चित्र सार्थ ३५

मांचिता च संजाता । तदा सातीवहर्षभृत्‌ः ॥ ८३ ॥ कुमारश्चित्रसेनोऽपि । पश्यन् सर्वं कुतूहलं ॥ तदा जगाद मित्रं स्वं । चित्ते संमुदितो भृशं ॥ ८४ ॥ मित्राद्य ते सहायेन । बाणमारोपयाम्यहं ॥ धनुष्यमुष्मिन् हर्षेण । कार्यसिद्धिर्यथा भवेत ॥ ८५ ॥ इत्युक्त्वा चित्रसेनोऽथ । गतः कोदंड-सन्निधौ ॥ नमस्कृत्य जिनेंद्रं स । स्मृत्वा चित्ते धनजयं ॥ ८६ ॥ चपलं धनुषि तस्मिन् । बाणमा-रोपयत्तदा ॥ पश्यत्सु च कुमारेषु । चित्रितेषु समेष्वपि ॥ ८७ ॥ पूरितं च तदा दृष्ट्वा । कुमारी स्वं मनोरथं ॥ अतीवहर्षसंपन्ना । जाता स्मेराननना तदा ॥ ८८ ॥ अथ कुमारिका शीघ्रं । माला-

॥ ८३ ॥ चित्रसेन कुमार पण सर्व कुतूहल जोइने आनंदित चित्तवाळो थयो थको पोताना मि-त्र प्रत्ये बोल्यो, ॥ ८४ ॥ हे मित्र हवे तारी सहायथी आ धनुष्य पर हुं बाण आरोपुं, के जेथी कार्यनी सिद्धि थाय. ॥ ८५ ॥ एम बोलीने चित्रसेन धनुष्यपासे गयो, अने त्यां तेणे जिनेश्वर ने नमस्कार करीने अने चित्तमां धनंजयने स्मरीने सर्व कुमारोना चित्रनी पेठे देखता तुरतज धनुषपर बाण आरोपण कर्युं. ॥ ८७ ॥ पोतानो मनोरथ पूर्ण थयेलो जोइने अति हर्षित थइ थकी, ते कुमारी प्रफुल्ल मुखवाळी थइ. ॥ ८८ ॥ त्यारपछी तुरतज आनंदित चहेरावाळी कुमारिका-

मारोपयत्तदा ॥ चित्रसेनकुमारस्य । कंपे स्मेराननना मुदा ॥ ८९ ॥ अज्ञातनरकंठे तां । दृष्ट्वा माल्यां प्रलंबितां ॥ रुष्टाः सर्वे कुमारास्ते । सायुधाश्च समुत्थिताः ॥ ९० ॥ कथयामासुरज्ञात—कुलमेनं वराककं ॥ हत्वा नूनं दुरात्मानं । लास्यामः कन्यकां वयं ॥ ९१ ॥ एवं विमृश्य सर्वेऽपि । तद्वधाय समुत्थिताः ॥ यक्षसहायतस्तावत ॥ कुमारः सन्मुखोऽभ्यगात् ॥ ९२ ॥ संग्रामो दारुणो जातः । कुमारेण समं ततः ॥ एकोऽप्यजयत्तानेष । मृगारिर्मृगयूथवत् ॥ ९३ ॥ राजा पद्मरथो यावन्निवारयति तानथ ॥ तावत्कश्चिज्जगौ भट्टः । कुमारबिरुदावलिं ॥ ९४ ॥ वीरसेनांगजो जी-

---

ए चित्रसेनकुमारना कंठमां वरमाळा आरोपी. ॥ ८९ ॥ अजाण्या पुरुषना कंठमां माळा पहेरेली जोइने सघळा कुमारो कोपित थइने आयुध सहित उभा थया. ॥ ९० ॥ अने कहेवा लाग्या के आ जेनुं कुळ नथी जणायुं एवा वराकने मारीने खरेखर अमे ते कन्याने लइ जशुं ॥ ९१ ॥ एम विचारीने ते सघळा तेने मारवा उभा थया. कुमार पण यक्षनी सहायथी ते मनी सामे आव्यो. ॥ ९२ ॥ त्यारबाद कुमारनी साथे दारुण संग्राम थयो, पण सिंह जेम मृगनां टोळांने तेम तेणे सघळा कुमारोने जीती लीधा. ॥ ९३ ॥ जेटलामां पद्मरथ राजा दरेकने वारेछे

या—द्वसंतपुरनायकः ॥ चित्रसेनकुमारोऽसौ । कलाविद्यादिपारगः ॥ ૯૫ ॥ इति कर्णामृतं वा-
क्यं । श्रुत्वा पद्मरथोऽब्रवीत् ॥ स्थीयतां स्थीयतां भूपाः । श्रूयतां भट्टवाचिकं ॥ ૯૬ ॥ श्रुत्वा तस्य
कुलोत्पत्तिं । विस्मितास्ते नृपं जगौ ॥ एतच्छौर्यं च गांभीर्यं । न हि क्षत्रिकुलं विना ॥ ૯૭ ॥ त-
तः सर्वेऽपि संजाता—स्तंप्रति प्रीतमानसाः ॥ तथा तं क्षामयामासुः । सर्वेऽपि नतमौलयः ॥૯૮॥
ततः पद्मरथो राजा । हर्षपूरितमानसः ॥ विवाहं कारयामास । कुमार्याः सह तेन सः ॥ ૯૯ ॥

---

तेटलामां एक भट्ट बिरुदावली बोल्यो ॥ ૯૪ ॥ वीरसेनराजानो पुत्र, अने वसंतपुरनो नायक
तथा कळा अने विद्यामां पारगत आ चित्रसेनकुमार जय पामो. ॥ ૯૫ ॥ आवी रीतनुं कर्णने
अमृत समान वाक्य सांभळीने पद्मरथ बोल्यो, हे राजाओ ! उभा रहो उभा रहो, अने आ भ-
ट्टनुं वचन सांभळो ? ॥ ૯૬ ॥ तेना कुळनी उत्पत्तिथी विस्मित थयेला ते सघळा कहेवा लाग्या
के आवुं शौर्य क्षत्रिय विना होय नहि. ॥ ૯૭ ॥ त्यारपछी ते सघळा कुमार तरफ प्रीतिवाळा थ-
या, अने मस्तक नमावीने तेनी क्षमा याचवा लाग्या. ॥ ૯૮ ॥ त्यारबाद हर्षित चित्तवाळा पद्म-
रथ राजाए कुमारीनुं तेनी साथे पाणिग्रहण कराव्युं. ॥ ૯૯ ॥ तथा करमोचनमां राजाए कुमा-

करमोचनके तेन । कुमाराय समर्पितं ॥ गजवाजिरथग्राम—वस्त्रालंकरणादिकं ॥ २०० ॥ योग्य· पाणिग्रहे जाते । मुदितौ तौ वधूवरौ ॥ पूर्वजवानुबंधेन । जातिस्मरणतोऽपि च ॥ १ ॥ राजा प· द्मरथो नृपान् । सत्कृत्याथ व्यसर्जयत् ॥ याचकान् पोषयामास । यथेष्ठं दानमानतः ॥ २ ॥ किय· त्यपि गते काले । चित्रसेनस्य तत्र च ॥ रजन्यां राज्यमन्येद्युः । स्मृतिमागान्निजं हृदि ॥ ३ ॥ रत्नसारं समाहूय । कथितं तेन तंप्रति ॥ श्वशुरगेहवासोऽयं । लज्जायै गदितः सतां ॥ ४ ॥ यतः —उत्तमाः स्वगुणैः ख्याता । मध्यमाश्च पितुर्गुणैः ॥ अधमा मातुलैः ख्याताः । श्वशुरैश्चाधमाध·

---

रने हाथी घोमा रथ गाम वस्त्र अने अलंकार विगेरे आप्यां. ॥ २०० ॥ योग्य लग्नथी, पूर्वभव· ना स्नेहथी अने जातिस्मरणज्ञानथी ते दंपती आनंद पाम्यां ॥ १ ॥ पद्मरथ राजाए पण बीजा राजाउनो योग्य सत्कार करी विसर्जन कर्या, अने याचकोने इच्छित दान विगेरेथी पोष्या. ॥ ॥ २ ॥ (एवी रीते) त्यां केटलोक काळ व्यतीत थतां एक रात्रिए चित्रसेनने पोतानुं राज्य याद आव्युं. ॥ ३ ॥ (त्यारे) तेणे रत्नसारने बोलावी कह्युं श्वशुरने घेर रहेवानुं डाह्या पुरु· पुरुषोए लज्जावाळुं कह्युं छे. ॥ ४ ॥ कारणके—उत्तमो पोताना गुणथी, मध्यमो पिताना गुण·

माः ॥ ५ ॥ रत्नसारस्ततो गत्वा । कथयामास भूपतिं ॥ यद्याज्ञा भवतां गच्छेत् । कुमारः स्वं पुरं-
प्रति ॥ ६ ॥ मातृपितृवियुक्तस्य । बहुकालो गतोऽस्य वै ॥ प्रसादं कुरु तत्स्वामिन् । स कुटुंबं मिलेद्
यथा ॥ ७ ॥ श्रुत्वा पद्मरथो राजा । मित्रस्येति वचस्तदा ॥ तत्प्रयाणस्य सामग्रीं । चकार प्रगुणां
ततः ॥ ८ ॥ सुखासने समारोप्य । सुतां पद्मावतीं च तां ॥ माता स्नेहपरा तस्यै । ददौ शिक्षां
हितैषिणी ॥ ९ ॥ श्वश्रूश्वशुरशुश्रूषा । करणीया निरंतरं ॥ भर्ता देव इवाराध्यः । स्त्रीणां भर्ता
हि देवता ॥ १० ॥ शिक्षामिति गृहीत्वा सा । मातृदत्तां हितावहां ॥ सैन्ययुक्ता चचालाथ । कु-

---

थी, अधमो मामाना गुणथी अने अधमाधमो ससराना गुणथी प्रसिद्ध थाय छे. ॥ ५ ॥ त्यार-
बाद रत्नसारे राजापासे जइ कह्युं के आपनी आज्ञा होय तो कुमार पोताने गाम जाय. ॥ ६ ॥
कुमारने मातापिताना वियोगमां घणो काळ व्यतीत थयो तेथी हवे आप प्रसाद करो के जेथी ते
कुटुंबने मळे ॥ ७ ॥ राजाए रत्नसारना आ वचन सांभळीने कुमारना प्रयाण माटे सर्व सामग्री
तैयार करी. ॥ ८ ॥ पोतानी पुत्री पद्मावतीने सुखासनमां बेसाडी स्नेहाळ तथा हितेच्छु माताए
तेणीने शिखामण आपी ॥ ९ ॥ सासु ससरानी हंमेशां सेवा करवी, अने पतिने देवनी पेठे

मारेण युता क्रमात् ॥ ११ ॥ अनेकनगरग्रामान् । समुल्लंघ्य प्रयाणकैः ॥ कुमारः परिवाराढ्यः । संप्राप्तो गहनं वनं ॥ १२ ॥ दृष्टस्तेनाथ न्यग्रोध—पादपोऽत्र मनोहरः ॥ शाखापत्रादिविस्तार—छत्राकारनिभो महान् ॥ १३ ॥ तत्रेऽथ तस्य वृक्षस्य । सैन्यं तेन निवेशितं ॥ तस्य शीतलछायायां । सुखं तस्थुश्च सैनिकाः ॥ १४ ॥ रजन्यां तत्र सौख्येन । सुप्ताः सर्वेऽपि सैनिकाः ॥ कुमारः सकलत्रोऽपि । सुप्तो मार्गश्रमाकुलः ॥ १५ ॥ मंत्रिपुत्रः स्थितस्तत्र । खड्गव्यग्रकरांबुजः ॥ स्वामिनं

---

आराधवो कारणके स्त्रीजनो पति एज देव छे ॥ १० ॥ कुमारी पण माताए दीधेली हितकारी शिखामण ग्रहण करीने सैन्य युक्त कुमार साथे आगळ चाली. ॥ ११ ॥ अनुक्रमे प्रयाणो करीने अनेक नगर अने गामडांओ पसार करीने कुमार एक गहन वनमां परिवार सहित आवी पहोंच्यो. ॥ १२ ॥ त्यां तेणे शाखा अने पत्र विगेरेना विस्तारथी छत्राकार थयेलो एक मनोहर अने महान वड जोयो, ॥ १३ ॥ ते वृक्षनी नीचे तेणे सैन्यनो पडाव नाख्यो, अने सैनिको पण तेनी शीतळ छायामां सुखे बेठा. ॥ १४ ॥ रात्रीने समये त्यां सघळा सैनिको तथा कुमार पण पोतानी प्रिया सहित मार्गना श्रमथी थाकी जवाथी सुखे सूइ गया. ॥ १५ ॥ त्यारे मंत्रिपुत्र पोताना

सुप्तमालोक्य । तदा प्राहरिकोव सः ॥ १६ ॥ अधिष्ठाताथ वृक्षस्तस्य । गोमुखाभिधयक्षकः ॥ चक्रेश्व-
रीयुतस्तत्र । वसति पादपे सदा ॥ १७ ॥ कुमारं यक्षिणीयक्षौ । वीक्ष्य तावथ जल्पतः ॥ मिथोऽस्य
हि निजं राज्यं । पिता दास्यति वा न वा ॥ १८ ॥ ज्ञात्वा ज्ञानोपयोगेन । यक्षोऽवग् यक्षिणींप्रति
॥ साधर्मिकोऽस्ति नोऽयं त—दुपकारिवचः शृणु ॥ १९ ॥ देशांतरगतस्यास्य । जननी तु मृता-
स्ति हा ॥ ततःप्रभृति जातोऽस्ति । पितान्यमहिषीवशः ॥ २० ॥ राज्ञस्तस्य महिष्यस्ति । द्वितीया
विमलाभिधा ॥ गुणसेनः सुतस्तस्याः । समस्ति गुणमंदिरं ॥ २१ ॥ निजपुत्रस्य राज्यार्थं । तया

---

स्वामिने सुतेला जोइने प्राहरिकनी पेठे हाथमां लड्ड लइने बेठो. ॥ १६ ॥ हवे ते झाडनो
अधिष्ठाता गोमुख नामनो यक्ष चक्रेश्वरी देवी सहित तेनापर रहेतो हतो. ॥ १७ ॥ ते बंनेए कु-
मारने जोइने आने पिता तेनुं राज्य आपशे के नहि विगेरे वातो परस्पर करवा लाग्या. ॥१८॥
( तेमां ) ज्ञानना उपयोगथी यक्षे यक्षिणीने कह्युं के आ कुमार आपणो साधर्मिक छे, तेथी
तेने उपकार करनारी वार्ता सांभळ ? ॥ १९ ॥ आना देशांतर जवापछी तेनी माता मरण
पामी छे. अने त्यारथी तेनो पिता बीजी राणीने वश थयो छे. ॥ २० ॥ ते बीजी विमला नाम-

कश्मलचित्तया ॥ उपायान् बहुशः कृत्वा । नृपतिर्विप्रतारितः ॥ २२ ॥ यदा यास्यति पुत्रोऽयं । पितृस्नेहेन मोहितः ॥ तत्र तुरंगमोपाया—न्नृपस्तं मारयिष्यति ॥ २३ ॥ कदाचित्पुण्ययोगेन । पुराद्यास्यत्ययं द्रुतं ॥ प्रतोली यंत्रयोगाद् द्रा—गस्योपरि पतिष्यति ॥ २४ ॥ कदाचिद्दैवतस्तस्य । संकटं तत्प्रयास्यति ॥ तदा सा विमला तस्मै । विषं नूनं प्रदास्यति ॥ २५ ॥ स्वपुत्रस्यैव राज्यार्थं । मारणोपायकत्रयं ॥ तयास्य नररत्नस्य । कृतमस्ति प्रियेऽधुना ॥ २६ ॥ पुनरस्य कुमारस्य । च-

---

नी राणी छे. तेणीने गुणना मंदिररूप गुणसेन नामनो पुत्र छे. ॥ २१ ॥ कलुषित चित्तवाळी एवी तेणीए पोताना पुत्रना राज्य माटे घणा उपायो करी राजाने छोळ्या छे ॥ २२ ॥ ज्यारे आ कुमार पितृस्नेहथी मोहित थइने त्यां जशे त्यारे राजा तेने घोडाना उपायथी मारशे. ॥ २३ ॥ कदाचित् पुण्यना योगथी शहेरमां जवा लागशे तो त्यां यंत्रना योगथी दरवाजो तेना पर पडशे. ॥ २४ ॥ कदाचित दैवना योगथी कुमारनुं ते संकट टळशे तो पण ते विमलाराणी तेने विष देशे. ॥ २५ ॥ हे प्रिया ! पोताना पुत्रना राज्यमाटेज आ नररत्नने मारवा माटे तेणीए आ त्रण उपायो कर्या छे. ॥ २६ ॥ वळी आ कुमारनी चोथी आपदा सांभळ ? आना पलंगपर सुतां ज-

तुर्थीं विपदं शृणु ॥ अस्य पर्यंकसुप्तस्य । दारुणात्पन्नगाद्भयं ॥ २८ ॥ एतच्चतुर्भयेभ्योऽयं । चेत्प्र
मुक्तो भविष्यति ॥ तदासौ सार्वभौमोऽत्र । नूनं राजा भविष्यति ॥ २९ ॥ श्रोतैतस्य वृत्तांतस्य
। सुहृदस्य यदा पुनः ॥ कथयिष्यति कस्यापि । तदाश्मामा भविष्यति ॥ ३० ॥ यक्षस्येति निश
म्याथ । वार्ता विस्मयकारिणीं ॥ रत्नसारोऽपि मौनेन । संस्थितो मित्रवत्सलः ॥ ३१ ॥ प्रभातसमये
जाते । जजागार नृपात्मजः ॥ परिवारयुतोऽरं च । स चचाल पथि क्रमात् ॥ ३२ ॥ सोऽविलंबप्र·
याणेन । प्राप्तः स्वपुरसन्निधौ ॥ वीरसेननृपस्ताव—त्तस्य सन्मुखमाययौ ॥ ३३ ॥ जनकं स्वं तदा·

---

यंकर सर्पथी भय छे. ॥ २८ ॥ जो ते कुमार आ चार भयथी विमुक्त थशे तो ते अहीं
सार्वभौम राजा थशेः ॥ २९ ॥ आ वार्तानो सांभळनार जो पोताना मित्रने अथवा कोइने पण
( ते वात ) कहेशे तो ते तुरतज पत्थररूप बनी जशे. ॥ ३० ॥ आश्चर्य पमाडनारी यक्षनी आ
वार्ता सांभळी मित्रमां प्रीतिवाळो रत्नसार पण मौन रह्यो. ॥ ३१ ॥ हवे प्रभातनो समय थातां
कुमार जाग्यो, अने अनुक्रमे तुरत परिवार सहित आगळ चाल्यो, ॥ ३२ ॥ ( ज्यारे ) अविलंब
प्रयाणथी कुमार पोताना पुर पासे आव्यो, त्यारे वीरसेन राजा तेनी सामे आव्यो. ॥ ३३ ॥

यांतं । चित्रसेनो विलोक्य च ॥ तुरंगमात्समुत्तीर्य । पितुः पादौ ननाम सः ॥ ३४ ॥ पितुर्मेलापके जाते । कुमारः स्नेहवत्सलः ॥ हर्षाश्रूणि मुमोचाथ । नयनाभ्यामनारतं ॥ ३५ ॥ पिता तु कृत्रिमस्नेहात । पृष्ट्वास्य कुशलादिकं ॥ तस्याधिरोहणार्थं च । ददौ दुष्टं तुरंगमं ॥ ३६ ॥ चातुर्यान्मंत्रिपुत्रेण । तत्समोऽन्यतुरंगमः ॥ तदार्पितः कुमाराय । यथा कोऽपि न जानते ॥ ३७ ॥ नानावादित्रनिःस्वान—वर्धापनपुरस्सरं ॥ गीयमानगुणो भट्टैः । परितो जयजयारवैः ॥ ३८ ॥ संयुतः परिवारेण । प्रतोलीं यावदागतः ॥ तावदागत्य मित्रेण । स तुरंगो मुखे हतः ॥ ३९ ॥ पश्चात्पादप्रचा·

---

चित्रसेने पोताना पिताने त्यां आवेला जोइ घोडापरथी उतरी पिताना पगने प्रणाम कर्या. ॥ ॥ ३४ ॥ पिताना मेळापथी स्नेहवत्सल कुमारनां बन्ने नेत्रोमांथी हर्षना अश्रुओ पडवा लाग्यां. ॥ ॥ ३५ ॥ पिताए पण कृत्रिम स्नेहथी कुमारना कुशळ वर्तमान पूछी तेने चडवा माटे दुष्ट अश्व आप्यो. ॥ ३६ ॥ पण मंत्रिपुत्रे चतुराइथी कुमारने कोइ न जाणे तेम तेना सरखो बीजो घोडो आप्यो. ॥ ३७ ॥ नाना प्रकारना वाजित्र अने निशान तथा वधामणीसहित भट्टोथी जेना गुण गवाय छे तथा जयजयकार बोलाय छे, एवो कुमार जेटलामां दरवाजा पासे आव्यो. तेटलामां मं·

रोऽश्वो । यावत्पश्चान्निवर्तितः ॥ प्रतोली सहसा तावत् । पतिता सा जनोपरि ॥ ४० ॥ लोके हा
हारवो जातो । विलक्षोऽभून्महीपतिः ॥ रक्षितः सुहृदा चैवं । कुमारो मृत्युसंकटात् ॥ ४१ ॥ पित्रा
विस्मितचित्तेन । सुतो नीतो निजगृहे ॥ तेनापि विनयात्तात—स्त्यक्तकोपः कृतः क्षणात् ॥ ४२ ॥
कुमारो विमलादेव्या । मिलनाय गतस्ततः ॥ उपमातुः पदद्वंद्वं । ननाम विनयेन सः ॥ ४३ ॥
तस्याश्च कुशलं पृष्ट्वा । तथा पुत्रादिकस्य च ॥ विनयान्नत्वा च तत्पादौ । सोऽथागान्निजमंदिरं ॥

---

त्रिपुत्रे घोमाना मुखपर ( मार ) मार्यो. ॥ ३७—३९ ॥ तेथी ते घोमो पाछो पण भरतो जेवा-
मां पाछो वळे छे, तेवामां ते दरवाजो लोकोपर पड्यो. ॥ ४० ॥ आ जोइ लोकोमां हाहाकार थ
यो, अने राजा विलक्ष थइ गयो, एवीरीते कुमारने तेना मित्रे मृत्युसंकटथी बचाव्यो. ॥ ४१ ॥
त्यारबाद विस्मय पामेलो राजा ते कुमारने पोताने घेर लइ गयो. अने तेणे पण विनयथी पि-
तानो कोप शांत पाड्यो. ॥ ४२ ॥ त्यारपछी कुमार विमला राणीने मळवा गयो, अने त्यां जइ
पोतानी सावकी माताना पगमां प्रणाम कर्या. ॥ ४३ ॥ तथा तेणीना अने तेना पुत्रना कुशळ
वर्तमान पूछी विनयथी तेने प्रणाम करी पोताने घेर आव्यो. ॥ ४४ ॥ आटलुं छतां पण दुष्ट

॥ ४४ ॥ तथापि दुष्टचित्ता सा । दुर्बुद्धिश्चेत्यचिंतयत् ॥ विषमोदकदानेन । मारमाम्यधुनापि तं ॥ ॥ ४५ ॥ विचिंत्येति तया चित्ते । मोदका विषमिश्रिताः ॥ कृता निमंत्रितश्चापि । कुमारो मित्रसंयुतः ॥ ४६ ॥ कृताश्च मोदकास्त्वन्ये । रत्नसारेण धीमता ॥ संगोप्य स्थापिताः स्वीयो—त्तरीयांतस्तदा खलु ॥ ४७ ॥ ततः सकलसामग्रीं । तया कृत्वा निवेशितौ ॥ मंत्रिपुत्रकुमारौ द्राक् । दुष्टया भोजनाय तौ ॥ ४८ ॥ भोजनावसरे तत्र । वीरसेनोऽपि चागतः ॥ परिवारयुतः सोऽपि । भोजनार्थमुपाविशत् ॥ ४९ ॥ राज्ञ्या दुश्चेष्टितं राजा । तदा जानाति नो मनाग् ॥ चित्रसेनोपरि

---

चित्तवाळी तथा दुर्बुद्धिवाळी एवी विमलाए आ कुमारने हुं विषवाळा मोदकना (प्रयोगथी) मारुं एम विचार्युं. ॥ ४५ ॥ एम चित्तमां विचारीने तेणीए विषवाळा मोदक बनाव्या, अने कुमारने तेना मित्रसहित (जमवा) नोतर्यो. ॥ ४६ ॥ त्यारे बुद्धिवान् रत्नसारे बीजा मोदक बनावी पोताना पछेडीमां छुपावी राख्या. ॥ ४७ ॥ त्यारपछी ते दुष्टाए सघळी सामग्री तैयार करी राजपुत्र अने मंत्रिपुत्रने जमवा बेसाड्या. ॥ ४८ ॥ भोजनसमये वीरसेन राजा पण त्यां आव्यो अने पोताना परिवारसहित जमवा बेठो. ॥ ४९ ॥ चित्रसेनपर अतिमोह धारण करतो राजा रा-

स्नेहं । धारयन् मानसे भृशं ॥ ५० ॥ विशालस्थालकच्चोल—पंक्तिषु विविधा तया ॥ सुरसा रसवती मुक्ता । स्वादिष्टा च मनोहरा ॥ ५१ ॥ वीरसेननृपस्यार्थं । सुदरा मोदकास्तया ॥ विविधव्यंजनोपेता । मुदाथ परिवेषिताः ॥ ५२ ॥ कुमारः सह मित्रेणो—पविष्टो भोजनाय सः ॥ तया विषयुता मुक्ता । मोदका अग्रनस्तयोः ॥ ५३ ॥ रत्नसारस्तपाकृत्य । हस्तलाघवविद्यया ॥ मोदकांस्तान् स्वपार्श्वस्थां—स्तत्स्थाने चामुचत्क्षणात ॥ ५४ ॥ कुमारोऽज्ञातवृत्तांतो । भुक्तवान् मित्रसंयुतः ॥ विमातुरपि स स्नेहं । मन्यमानोऽधिकाधिकं ॥ ५५ ॥ भोजनानंतरं भुक्तं । तांबूलं च तयार्पितं ॥

---

णीनुं दुश्चरित्र जरापण जाणतो नहोतो. ॥ ५० ॥ तेणीए विशाळ थाळमां अने कचोळांनी श्रेणीमां विविध प्रकारनी स्वादिष्ट अते मनोहर रसवती मुकी. ॥ ५१ ॥ तेणीए वीरसेन राजाने विविध प्रकारनां शाकसहित सुंदर लाडवाओ हर्षथी पीरस्या. ॥ ५२ ॥ कुमार पण पोताना मित्रनी साथे जमवा बेठो हतो तेमनी पासे तेणीए विषवाळा लाडु मूक्या. ॥ ५३ ॥ रत्नसारे पोतानी हाथचालाकीथी ते विषवाळा मोदक उपाडी लइ तेने स्थाने पोतानी पासे हता ते मूक्या. ॥ ५४ ॥ आ वृत्तांतथी अजाण्यो कुमार अपरमातानो पण अधिकाधिक स्नेह मानतो मित्र स-

कुमारेणातिहर्षेण । लवंगैलासमन्वितं ॥ ५६ ॥ सत्कृतोऽसौ ततो वस्त्रा—नूषणादिभिरेतया ॥ कुमारश्च समागञ्च—न्मित्रयुक्तः स्वमंदिरं ॥ ५७ ॥ स्नुषा पद्मावती सापि । सत्कृता जोजनादिनः ॥ तयाथ मुदिता बाढं । समायाता निजं गृहं ॥ ५८ ॥ दैवानुकूल्यतः पुंसां । तथा पुण्यानुभावतः ॥ ॥ नवेद्विषं हि पीयूषं । जवेन्माल्यं भुजंगमः ॥ ५९ ॥ वीरसेनो नृपस्तात्र—ऽजन्यामित्यचिंतयत ॥ हा मया तु सुपुत्रस्य । मारणायैव चिंतितं ॥ ५९ ॥ धिग्मे हि पौरुषं लोके । धिग्मे बुद्धिं च गर्हितां ॥ पुत्ररत्नविनाशाय । मयोपायाः कृता हहा ॥ ६० ॥ इति वैराग्यरंगाढ्यो । यावत्तिष्ठति

---

हित जम्यो. ॥५५॥ भोजन पछी कुमारे अतिहर्षथी तेणीए आपेलुं लवंग एलची विगेरेथी युक्त तांबूल खाधुं. ॥ ५६ ॥ त्यारपछी वस्त्र आनूषणविगेरेथी सत्कृत थयेलो कुमार पोताना मित्र सहित पोताने घेर आव्यो. ॥५७॥ ते पद्मावती वहु पण जोजन विगेरेथी सत्कृत थइने हर्षित थइ थकी पोताने घेर आवी ॥५८॥ दैव अनुकुळ होयतथा पुण्यनो अनुजाव होय तो मनुष्यने विष पण अमृत समान थाय छे, अने सर्प पण माळारूप थाय छे. ॥५९॥ त्यारपछी रात्रीना वीरसेन राजा चिंतववा लाग्यो के अरेरे ! कुलीन पुत्रने मारवाने में उपाय कर्या. ॥५९॥ मारा शौर्यने धिक्कार पडो? मारी

नृपतिः ॥ तावच्चरमतीर्थेश—स्तत्रागाद्विहरंस्तदा ॥ ६१ ॥ समवसरणं तत्र । कृतं देवैर्मनोहरं ॥
सुवर्णरूप्यमाणिक्य—शालत्रयविराजितं ॥ ६२ ॥ तत्राशोकद्रुमस्याथो—ऽधस्तात्प्रभुरुपाविशत ॥
दिव्यसिंहासने रम्ये । चतुराननशोभितः ॥ ६३ ॥ मुक्त्वा स्वकीयवैराणि । हिंस्रकाः श्वापदा
अपि ॥ समवसरणे तत्र । संस्थिता हर्षसंयुताः ॥ ६४ ॥ यतः—सारंगी सिंहशावं स्पृशति सुत
धिया नंदिनी व्याघ्रपोतं । मार्जारी हंसबालं प्रणयपरवशा केकिकांता भुजंगं ॥ वैराण्याजन्मजा-

---

निंदनिक बुद्धिने धिक्कार पम्हो ? के जेथी पुत्ररत्नना नाशमाटे में उपायो कर्या. ॥ ६० ॥ एवीरी-
ते वैराग्यना रंगवाळो थयो थको राजा रह्यो छे तेवामां महावीरप्रभु विहार करता त्यां आवी चड्या.
॥ ६१ ॥ त्यां देवोए सोनां रुपां अने माणेक एम त्रण प्रकारना प्राकारथी शोभितुं समवसरण र-
च्युं. ॥ ६२ ॥ तेमां अशोकवृक्षनी नीचे दिव्य सिंहासनपर चार मुखथी शोभता प्रभु बेठा. ।६३।
ते समवसरणमां हिंसक प्राणीओ पण पोतपोतानां वैर मूकी हर्षथी बेठां. ॥६४॥ कह्युं छे के—शांत
छे चित्त जेनुं, नाश पाम्यां छे पाप जेनां, तथा क्षीण थयो छे मोह जेनो एवा जिनेश्वरने जोइने
नाश पाम्यो छे मद जेमनो एवा जंतुओ जन्मथीज उत्पन्न थला वैरने पण त्यजी दे छे, दाखला

तान्यपि गलितमदा जंतवः संत्यजंति । दृष्ट्वा शांतैकचित्तं प्रशमितकलुषं तं जिनं क्षीणमोहं ॥
॥ ६५ ॥ ज्ञात्वार्हदागमं तत्र । राजागात सपरिछदः ॥ महीतले नमन्मौलि—स्तं ननाम जगत्प्रभुं
॥ ६६ ॥ भवपाथोधिनिस्तारां । कारुण्यैकरसान्वितां ॥ देशनां श्रीजिनेंद्रोऽदा—द्भव्यानंदविधायि-
नीं ॥ ६७ ॥ यथा—अनित्यानि शरीराणि । विभवो नैव शाश्वतः ॥ नित्यं सन्निहितं मृत्यु । क-
र्तव्यो धर्मसंग्रहः ॥ ६७ ॥ जैनधर्मं समाराध्य । भूत्वा विभवभाजनं ॥ प्राप्ताः सिद्धिसुखं ये ते ।
श्लाघ्या मंगलकुंभवत ॥ ६८ ॥ तद्यथा—

---

तरीके—हरिणी सिंहना बच्चांने, गाय वाघना बच्चांने, बिलाडी हंसना बच्चांने, अने मयूरी सर्पने
प्रेमवशी थइ थकी पुत्रबुद्धीथी स्पर्श करे छे. ॥ ६५ ॥ राजा अरिहंतनुं आगमन जाणी पोता-
ना परिवारसहित त्यां गयो, अने मस्तक नमावी जगत्प्रभुने नमस्कार कर्या. ॥ ६६ ॥ त्यां श्रीजि-
नेश्वरे भवसमुद्रथी तारनारी, कारुण्यरसथी भरपूर अने भव्यलोकोने आनंद आपनारी देशना
शरु करी. ॥ ६७ ॥ यथा—आ शरीर क्षणभंगुर छे, वैभव चपळ छे, अने मृत्यु हंमेशां निश्चित
छे. तेथी धर्मनो संग्रह करवो, ॥ ६७ ॥ जैनधर्म आराधीने वैभवी थइने मंगळकळशनी पेठे जेओ

उज्जयिन्यां महापुर्यां । वैरिसिंहो महीपतिः ॥ सोमचंद्रा च तद्भार्या । धनदत्तश्च श्रेष्ठ्यभूत ॥ ६९ ॥ धर्मार्थी सुविनीतात्मा । सत्यशीलदयान्वितः ॥ गुरुदेवार्चने प्रीतः । स श्रेष्ठी धनदत्तकः ॥ ७० ॥ सत्यभामेति तद्भार्या । शीलालंकृतिशालिनी ॥ पत्यौ प्रेमपरा किंत्व—पत्यकांडविवर्जिता ॥ ७१ ॥ सान्यदा श्रेष्टिनं पुत्र—चिंताम्लानमुखांबुजं ॥ दृष्ट्वा पप्रच्छ हे नाथ । किं ते दुःखस्य कारणं ॥ ७२ ॥ श्रेष्टिना च समाख्याते । तस्यै तस्मिन् यथास्थिते ॥ श्रेष्टिनी पुनर

---

सिद्धिसुख पाम्या ते प्रशंसनीय छे. ॥ ६८ ॥ तेनी कथा नीचे प्रमाणे छे—

उज्जयिनी नगरमां वैरीसिंह नामनो राजा हतो, तेने सोमचंद्रा (नामनी) राणी हती, तथा (त्यां) धनदत्त (नामनो एक) श्रेष्टी (रहेतो) हतो. ॥ ६९ ॥ ते धनदत्त श्रेष्टी धर्मिष्ट, विनयी, सत्यवादी, सुशील, दयालु, तथा देवगुरुनीसेवामां प्रीतिवाळो हतो. ॥ ७० ॥ तेने शीलथी विभूषित, पतिपरायणा, परंतु संतति विनानी सत्यभामा (नामनी) पत्नी हती. ॥७१॥ एक दिवस तेणीए पोताना पतिने पुत्रनी चिंताथी मलिन मुखवाळो जोइ पूछ्युं ? हे नाथ आपने दुःखनुं कारण शुं छे ? ॥ ७२ ॥ शेठे पण तेणीने ते वृत्तांत यथास्थित पणे कहेतां शेठाणीए पुनः कह्युं

थ्यूते । पर्याप्तं चिंतयानया ॥ १३ ॥ धर्म एव भवेन्नृणा—मिहामुत्र सुखप्रदः ॥ स एव सेवनीयो हि । विशेषेण सुखैषिणा ॥ १४ ॥ हृष्टः श्रेष्ठ्यप्युवाचैवं । प्रिये साधूदितं त्वया ॥ सम्यगाराधितो धर्मो । भवेच्चिंतामणिप्रभः ॥ १५ ॥ तत्त्वं देवगुरौ चापि । कुरु भक्तिं यथोचितां ॥ देहि दानं सुपात्रेभ्यः । पुस्तकानि च लेखय ॥ १६ ॥ कुर्वंत्या इति ते पुत्रो । भावी यदा तदा वरं ॥ भविता निर्मलश्चापि । परलोकोऽन्यथावयोः ॥ १७ ॥ ततश्च देवपूजार्थं । पुष्पग्रहणहेतवे ॥ आकार्यारामिकं तस्मै । ददौ श्रेष्ठी धनं बहु ॥ १८ ॥ स्वयं गत्वा तदारामे । पुष्पाण्यानीय स प्रगे ॥ गृहार्चा-

---

एवी चिंतार्थी सर्युं !॥ १३ ॥ मात्र धर्मज मनुष्यने आ भवमां अने परभवमां सुखदायक छे, तेथी सुखनी इच्छा राखनारे तेज विशेषे करीने सेववो. ॥ १४ ॥ ( आ सांभळी ) शेठ बोल्या हे प्रिया ! तें सारुं कह्युं सम्यक् प्रकारे आराधेलो धर्म चिंतामणी समान थाय छे. ॥ १५ ॥ तेथी तुं पण देवगुरुनी यथोचित भक्ति कर ? सुपात्रोने दान दे ? तथा धर्मपुस्तको लखाव. ?॥ १६ ॥ एम करतां जो तने पुत्र थाय तो सारुं, नहितर पण आपणो परलोक निर्मळ थशे. ॥ १७ ॥ त्यारबाद ते श्रेष्ठीए देवपूजामाटे पुष्प लेवासारु माळीने बोलावी बहु धन आप्युं. ॥ १८ ॥ त्या-

मर्चयित्वा च । गत्वितस्म जिनालये ॥ ७९ ॥ तत्र नैषेधिकीमुख्यान । यथास्थानं दशत्रिकान् ॥
स्थापयन् परया भक्त्या । विदधे चैत्यवंदनं ॥ ८० ॥ ततः साधून्नमस्कृत्य । प्रत्याख्यानं विधाय च
॥ अतिथीनां संविभागं । स चकार महामतिः ॥ ८१ ॥ अन्यदा त्वखिलं धर्म—कर्म शर्मनिबंधनं
॥ आह्निकं रात्रिकं चैव । धनदत्तो व्यधात्सुधीः ॥ ८२ ॥ अथ धर्मप्रभावेण । तुष्टा शासनदेवता
॥ ददौ तस्मै पुत्रवरं । प्रत्यक्षीभूय सान्यदा ॥ ८३ ॥ पुत्रे गर्भागते रात्रि—शेषे श्रेष्ठिन्युदैक्षत ॥

---

रपछी हमेशां सवारमां पोते आराममां जइ पुष्प लावी गृहप्रतिमाने पूजी जिनालये जतो. ॥
॥ ७९ ॥ त्यां परम भक्तिथी नैषेधिकी प्रमुख दश त्रिकोनो यथास्थान उपयोग करी चैत्यवंदन
करतो. ॥ ८० ॥ त्यार पछी साधुजनने नमीने तथा अतिथिसंविभागव्रतनुं प्रत्याख्यान करी ते म-
हाबुद्धिवान (श्रेष्ठी) घेर आवतो. ॥ ८१ ॥ घणीवार तो ते बुद्धिवान् धनदत्त आखो दिवस
अने रात सुख आपनारां धर्मकार्यो करतो. ॥ ८२ ॥ हवे एक दिवसे धर्मना प्रभावथी संतुष्ट थ-
येली शासनदेवीए प्रत्यक्ष थइ तेने पुत्रनुं वरदान आप्युं. ॥ ८३ ॥ हवे पुत्र गर्भमां आवते छते
ते शेठाणीए स्वप्नमां सर्व मंगलिकोथी ढंकायेलो तथा सुवर्णनो पूर्ण कुंभ जोयो. ॥ ८४ ॥ यो-

स्वप्ने हेममयं पूर्णं । कलशं मंगलावृतं ॥ ८४ ॥ जातश्च समये पुत्र—स्ततः कृत्वोत्सवं गुरुं ॥ त-
स्मै मंगलकलश । इत्याख्यां तत्पिता ददौ ॥ ८५ ॥ कलाभ्यासपरः सोऽथा—ष्टवर्षप्रमितोऽन्यदा
तात त्वं कुत्र यासीति । पप्रच्छ पितरं निजं ॥ ८६ ॥ सोऽवदद्वत्स गत्वाह—मारामे प्रतिवासरं ॥
ततः पुष्पाणि चानीय । करोमि जिनपूजनं ॥ ८७ ॥ ययौ पित्रा सहान्येद्यु—स्तत्र सोऽपि कुतूह-
ली ॥ आरामिकोऽवदत् कोऽयं । बालो नेत्रविलासकः ॥ ८८ ॥ ज्ञात्वा च श्रेष्ठिपुत्रं तं । तस्मै सो-
ऽपि ददौ मुदा ॥ नारंगदाडिमादीनि । सुस्वादूनि फलान्यलं ॥ ८९ ॥ स्वगेहे पुनरागत्य । कु-

---

ग्य समये तेणीने पुत्र जन्म्यो, त्यारे तेना पिताए मोटो उत्सव करी मंगळकळश एवुं तेनुं नाम पाड्युं. ॥८५॥ हवे ज्यारे ते कळाभ्यास करतो आठ वर्षनो थयो त्यारे एक दिवसे तेणे पोताना पिताने पूछ्युं हे तात ! आप शिद पधारो छो ? ॥ ८६ ॥ (त्यारे) ते बोल्यो हुं हंमेशां बगीचामां जइ त्यांथी पुष्प लावी जिनपूजन करुं छुं. ॥ ८७ ॥ एक दिवस कुतूहली मंगलकळश पण पितानी साथे उद्यानमां गयो त्यां माळीए पूछ्युं नेत्रने आनंद आपनारो आ बाळक कोण छे ? ॥ ८८ ॥ पछी तेणे तेने शेठनो पुत्र जाणी हर्षथी नारंगी दाडिम विगेरे स्वादिष्ट फळो आप्यां.

चित्र·
सार्थ

र्वतो जिनपूजनं ॥ श्रेष्टिनोऽढौकयत्पुत्रः । पूजोपकरणं स्वयं ॥ ८० ॥ द्वितीये च दिने तेन । सा·
दरं भणितः पिता ॥ गन्ताम्यतः परं चाहं । पुष्पानयनहेतवे ॥ ८१ ॥ निश्चिंतेनैव स्थातव्यं । त्व·
या तात निजे गृहे ॥ अत्याग्रहेण तद्वाक्य—मनुमेने पितापि तत ॥ ८२ ॥ एवं च कुर्वतस्तस्य ।
धर्माभ्यासं तथांतरा ॥ कियत्यपि गते काले । यज्जातं तन्निशम्यतां ८३ ॥ अस्त्यत्र भरतक्षेत्रे ।
चंपानामममहापुरी ॥ अभूतत्र महाबाहुः । पार्थिवः सुरसुंदरः ॥ ८४ ॥ राज्ञी गुणावली तस्य । सा

॥ ७९ ॥ ( त्यारबाद ) तेणे पुनः घेर आवी पूजा करता शेठने पोतेज पूजानां साहित्यो लावी आप्यां. ॥ ८० ॥ बीजे दिवसे तेणे आदर सहित पोताना पिताने कह्युं के हवेथी पुष्प लेवा हुं जइश. ॥८१॥ अने हे पिताजी आपे निश्चिंत थइने घेर रहेवुं, त्यारे पिताए पण तेना अति· आग्रहथी तेनुं वचन मान्य कर्युं. ॥८२॥ एवीरीते आ तथा धर्मनो अभ्यास करतां तेनो केटलोक समय व्यतीत थतां जे बन्युं ते सांभळो ? ॥ ८३ ॥ आ भरतक्षेत्रमां चंपा नामे एक मोटी नग· री छे, त्यां महाबळवान सुरसुंदर ( नामनो ) राजा हतो. ॥ ८४ ॥ तेने गुणावली नामनी राणी हती, तेणीए पोताना खोळामां कल्पवेलीने पडेली जोइ राजाने ( ते वात ) निवेदन करी. ॥

निजोत्संगवर्तिनीं ॥ दृष्ट्वा कल्पलतां स्वप्ने । पार्श्वेवाय न्यवेदयत ॥ ९५ ॥ राजा प्रोवाच हे देवि । तव पुत्री भविष्यति ॥ सर्वलक्षणसंपूर्णा । सर्वनारीशिरोमणिः ॥ ९६ ॥ पूर्णे कालेऽथ चार्वंगीं । सा देवी सुषुवे सुतां ॥ त्रैलोक्यसुंदरी नाम । तस्याश्चक्रे महीपतिः ॥ ९७ ॥ लावण्यरसमंजूषा । सौभाग्यरसनिम्नगा ॥ बभूव यौवनं प्राप्ता । सा मूर्त्तेव सुरांगना ॥ ९८ ॥ तां विलोक्यानवद्यांगीं । दध्याविति धरापतिः ॥ रमणः कोऽनुरूपोऽस्याः । सुताया मे भविष्यति ॥ ९९ ॥ ऊचे च प्रेयसीं राजा । वरार्हेयं सुताभवत् ॥ दातव्या ब्रूत तत्कस्मै । मातुरत्र प्रधानता ॥ २०० ॥ राज्य

---

॥ ९५ ॥ ( त्यारे ) राजा बोल्यो हे देवी ! तने सर्व लक्षणोथी संपूर्ण ( तथा ) सर्व स्त्रीओमां शिरोमणी ( एवी एक ) पुत्री थशे. ॥ ९६ ॥ ( त्यारपछी ) पूर्ण समये तेणीए सुंदर अंगवाळी पुत्रीने जन्म आप्यो, ( अने ) राजाए तेणीनुं त्रैलोक्यसुंदरी नाम पाड्युं. ॥ ९७ ॥ लावण्यरसनी पेटी, तथा सौभाग्यरसनी नदी, तथा साक्षात सुरांगना जेवी एवी ते यौवन पामी. ॥ ॥ ९८ ॥ राजा तेणीने यौवनपूर्ण अंगवाळी जोइ विचारवा लाग्यो के मारी पुत्रीने लायक आनो कोण पति थशे. ॥ ९९ ॥ (त्यारपछी) राजाए (पोतानी) राणीने पूछ्युं के आ पुत्री वरयोग्य

वगियमस्माकं । जीवितादपि वल्लभा ॥ नालं धर्तुं वयं प्राणान् । क्षणमप्यनया विना ॥१॥ दातव्या तदसौ मंत्रि—पुत्रायात्रैव हे प्रिय ॥ प्रत्यहं नयनानंद—कारिणी दृश्यते यथा ॥ २ ॥ ततो राज्ञा समाहूय । सुबुद्धिः सचिवो निजः ॥ अभाणि यन्मया दत्ता । त्वत्सुतायात्मनंदिनी ॥ ३ ॥ अमात्योऽप्यब्रवीद्देव । किमयुक्तं ब्रवीष्यदः ॥ कस्मैचिद्राजपुत्राय । दातुं कन्या तवोचिता ॥ ४ ॥ राजोचे तं त्वया वाच्य—मित्यर्थे किंचनापि न ॥ दत्ता त्वत्सूनवे चेयं । पुत्री त्रैलोक्यसुंदरी ॥ ५ ॥

---

थइ छे माटे ते कोने देवी ते कहे ! (कारणके) तेमां मातानुं प्राधान्य होय छे. ॥ १०० ॥ (त्यारे) राणी बोली आ (पुत्री) अमोने जीवितथी पण वहाली छे एना विना अमे क्षण पण प्राण धारण करी शकीशुं नहि. ॥ १ ॥ तेथी हे प्रिय ! तेणीने अहिंज मंत्रिपुत्रने देवी. के जेथी नेत्रने आनंद आपनारी ते हंमेशां नजरे पडे. ॥ २ ॥ पछी राजाए पोताना सुबुद्धि प्रधानने बोलावी कह्युं के हुं मारी पुत्री तारा पुत्रने आपुंछुं. ॥ ३ ॥ (त्यारे) प्रधान पण बोल्यो के आवुं अयुक्त शुं बोलो छो ? ते कन्या कोइ राजपुत्रने देवी योग्य छे. ॥ ४ ॥ राजा बोल्यो तारे आ संबंधमां कंइ बोलवुं नहि. में (तो) तारा पुत्रने (मारी) कन्या त्रैलोक्यसुंदरी दीधी. ॥

अथ चिंतातुरो मंत्री । गृहे गत्वा व्यचिंतयत ॥ हा व्याघ्रदुस्तटीन्याये । पतितोऽस्मि करोमि किं ॥
॥ ६ ॥ रतिरंभोपमाकारा । राज्ञः पुत्री सुतस्तु मे ॥ कुष्टी तदेतयोर्योगं । कथं जानन् करोम्यहं ॥
॥ ७ ॥ अथवायं मयोपायो । लब्धो यत्कुलदेवतां ॥ आराध्य साधयिष्यामि । सर्वमात्मसमीहितं
॥ ८ ॥ सोऽथ ह्याराधयामास । विधिना कुलदेवतां ॥ उवाच सापि प्रत्यक्षी—भूय मंत्रिन् स्मृतास्मि
किं ॥ ९ ॥ मंत्र्यूचे त्वं स्वयं वेत्सि । सर्वं मे दुःखकारणं ॥ तथा कुरु यथा पुत्रो । नीरोगांगो
भवेन्मम ॥ १० ॥ देव्यूचे नान्यथाकर्तुं । नृणां कर्म पुराकृतं ॥ दैवतैरपि शक्येत । वृथेयं प्रार्थना

---

॥ ५ ॥ हवे चिंतातुर मंत्री घेर जइ विचारवा लाग्यो, अरेरे ! हुं ( तो ) व्याघ्रतटी न्यायमां प-
ड्यो, हवे शुं करुं ? ॥ ६ ॥ राजानी पुत्री रति अथवा रंभा जेवी छे, अने मारो पुत्र तो कुष्टी छे,
तेथी जाणता छतां पण हुं तेमनो संयोग केम थवा दउं ? ॥ ७ ॥ ठीक ! मने आ उपाय म-
ळ्यो. के कुलदेवताने आराधी मारुं धारेलुं कार्य साधुं. ॥ ८ ॥ त्यारपछी तेणे विधिपूर्वक कुल-
देवीने आराधी, तेणीए पण प्रत्यक्ष थइने पूछ्युं. हे मंत्रिन्! तें मने शामाटे याद करी ? ॥ ९ ॥
मंत्री बोल्यो तुं पोतेज मारा सर्व दुःखनुं कारण जाणे छे, (माटे) मारो पुत्र निरोगी शरीरवाळो

तव ॥ ११ ॥ मंत्री प्रोवाच यद्येवं । तदन्यमपि पूरुषं ॥ तदाकारं सुरूपं च । कुतोऽप्यानीय मेऽर्पय ॥ १२ ॥ तेनोद्वाह्य महाराज—पुत्रीं कमललोचनां ॥ अर्पयिष्यामि पुत्रस्य । करिष्येऽस्य यथोचितं ॥ १३ ॥ देवतोचे पुरीद्वारे । वाजिरक्षकसन्निधौ ॥ शीतव्यथानिरासार्थ—मग्निसेवापरो हि यः ॥ १४ ॥ कुतोऽप्यानीय मयका । मुक्तो भवति बालकः ॥ स मंत्रिन् भवता ग्राह्यः । पश्चात्कुर्या यथोचितं ॥ १५ ॥ युग्मं ॥ इत्युक्त्वांतर्दधे देवी । हृष्टोऽथ सचिवेश्वरः ॥ सर्वां विवाहसामग्रीं । प्रगु-

---

थाय तेवुं कर ? ॥ १० ॥ ( त्यारे ) देवी बोली मनुष्योनुं पूर्वे करेलुं कर्म देवताओथी पण निवारी शकातुं नथी, ( तेथी ) आ तारी प्रार्थना वृथा छे, ॥ ११ ॥ मंत्री बोल्यो जो एम होय तो तेना जेवा आकारवाळा तथा स्वरूपवान् कोइ बीजा पुरुषने क्यांकथी लावी मने आप ? ॥ १२ ॥ तेनी साथे कमळसरखा नेत्रवाळी राजपुत्रीने परणावी ( मारा ) पुत्रने ते सोंपीश. ( अने ) ते ( पुरुषनुं ) जेम योग्य लागशे तेम करीश. ॥ १३ ॥ ( त्यारे ) देवी बोली हे मंत्रिन्! ( आ ) शहेरना दरवाजा पासे अश्वरक्षकपासे टाढनी व्यथा निवारवामाटे अग्निनुं सेवन करतो जे बालक ( देखाय ) ते गमे त्यांथी लावी में मूकेलो हशे, ते तारे लेवो अने पछी तने योग्य लागे तेम

णीकुरुतेस्म सः ॥ १६ ॥ अश्वपालनरं छन्न—माकार्य निजकं ततः ॥ तस्मै निवेदयित्वा च । सर्वं वृत्तांतमादितः ॥ १७ ॥ इदमूचे च यः कश्चि—दभ्येति त्वदंतिके ॥ कुतोऽपि बालकोऽसौ हि । समर्प्यो मेऽविलंबनः ॥ १८ ॥ तं श्रेष्टिनंदनं तस्या । वरं विज्ञाय सा वेनं ॥ उज्जयिन्यां ययौ पुर्यां । मंत्रिणः कुलदेवता ॥ १९ ॥ अंतरिक्षस्थितोवाच । सा चैवं तस्य शृण्वतः ॥ पुष्पाण्यानीय चारामा—द्व्रजतो निजवेश्मनि ॥ २० ॥ स एष बालको याति । पुष्पभाजनपाणिकः ॥ परिणे·

---

करवुं. ॥ १४–१५ ॥ एम कही देवी अंतर्ध्यान थइ गइ, पछी ते प्रधान आनंदित थइने सघळी विवाहनी सामग्री तैयार करवा लाग्यो ॥ १६ ॥ त्यारपछी तेणे पोताना अश्वपालकने गुप्तरीने बोलावी तेने आदिथी सर्व वृत्तांत कही ॥ १७ ॥ कह्युं के क्यांइथी पण कोइ बालक तारी पासे आवे, तेने तारे मने तुरत सोंपवो. ॥ १८ ॥ ( हवे ) ते मंत्रीनी कुळदेवी ते श्रेष्टिना पुत्रने ( मंगळकळशने ) ते कन्यानो भावी वर जाणीने उज्जयिनी नगरीमां गइ. ॥ १९ ॥ ( त्यां जइ ) आराममांथी पुष्प लइ पोताने घेर आवतो कुमार सांभळे तेवीरीते अंतरिक्षमां नीचेप्रमाणे बोली. ॥ २० ॥ जेना हाथमां पुष्पनुं वासण छे एवो आ तेज कुमार छे, के जे भाडुतीरीते राज·

ष्यति यो राज—कन्यकां भाटकेन हि ॥ २१ ॥ तत् श्रुत्वा विस्मितः सोऽथ । किमेतदिति संभ्रमात् ॥ नास्य कथयिष्यामी—ति ध्यायन् सदनं ययौ ॥ २२ ॥ गृहं गतस्य सा वाणी । विस्मृता तस्य दैवती ॥ द्वितीयदिवसेऽप्येवं । श्रुत्वा सोऽथ व्यचिंतयत् ॥ २३ ॥ अहो अद्यापि सा वाणी । श्रुता या ह्यो मयांबरे ॥ तदद्य सदनं प्राप्तः । कथयिष्याम्यहं पितुः ॥ २४ ॥ चिंतयतीत्यसौ यावत्—तावदुत्पाट्य वात्यया ॥ नीतो दूरतरारण्ये । चंपापुर्याः समीपगे ॥ २५ ॥ भयभ्रांततृषाक्रांतः । श्रांतस्तत्र स बालकः ॥ मानसाख्यसरस्तुल्यं । ददर्शैकं सरोवरं ॥ २६ ॥ तत्र वस्त्रांचलात्पूतं । प-

---

कन्याने परणशे. ॥ २१ ॥ ते सांभळी ( कुमार ) संभ्रमथी चकित थयो थको ( आ हुं ) पिताने कहीश एम विचारतो घेर गयो. ॥ २२ ॥ तेना घेर जतां ते देवताइ वाणी विसराइ गइ. ( पण ) बीजे दिवसे पण एवीरीतनी ( वाणी ) सांभळी ते चिंतववा लाग्यो, ॥ २३ ॥ अहो! आजे पण मने तेज आकाशवाणी संभळाणी, माटे आजे घेर जइ हुं ( ते ) पिताने कहीश. ॥ २४ ॥ ते जेटलामां एम चिंतवे छे, तेटलामां पवने तेने उपाडी चंपापुरीनी पासे बहु दूर अरण्यमां मूकी दीधो. ॥ २५ ॥ त्यां भयभीत तृषातुर तथा थाकेला ( एवा ) ते कुमारे मानसरो-

यः पीत्वातिशीतलं ॥ तत्से[illegible]मारूढं । स शिश्राय वटद्रुमं ॥ २७ ॥ तदा चास्तमितो भानु—र्विपदि पतितस्य हि ॥ श्रेष्ठिपुत्रस्य तस्योप—कारं कर्तुमिवाक्षमः ॥ २८ ॥ कृत्वा दर्भतृणै रज्जूं । तया रज्ज्वा च तं द्रुमं ॥ समारूढो ददर्शासौ । ज्वलंतमनलं क्वचित् ॥२९॥ ततो वटात्समुत्तीर्य । स भीतः शीतविद्रुतः ॥ हुताशनानुसारेण । चंपापुर्या ययौ बहिः ॥३०॥ ततः पार्श्वेऽश्वपालानां । कुर्वाणो वह्निसेवनं ॥ यावदास्मीदसा हस्य—मानस्तैर्दुष्टचेष्टितै ॥ ३१ ॥ तावत्तेन नरेणैत्य । पूर्वा-

---

वरजेवुं एक सरोवर जोयु. ॥ २६ ॥ त्यां तेणे वस्त्रना छेडाथी गळेलुं अतिशीतळ जळ पीधुं, (अने पछी ) तेनी पाळपर आवेलां एक वड वृक्षनो आश्रय लीधो. ॥ २७ ॥ तेटलामां सूर्य पण आपत्तिमां पडेला शेठना पुत्रने उपकार करवाने अशक्त होय तेम अस्त पाम्यो. ॥ २८ ॥ (त्यारपछी ) तेणे दर्भना तृणथी ( एक ) दोरडुं बनावी ते दोरडांथी ( पोते ) झाडपर चड्यो, (त्यां तेणे ) क्यांक अग्नि बळतो जोयो. ॥ २९ ॥ त्यारपछी वडथी उतरी भयभीत ( थयेलो ) तथा टाढथी हेरान थतो ( एवो ) ते ( कुमार ) अग्निने अनुसारे चंपापुरीनी बहार आव्यो. ॥ ३० ॥ ( पछी ) त्यां अश्वपालोनी पासे खराब चाळा करनारा एवा तेओथी हसातो जेटलामां अग्निनुं से-

दिष्टेन मंत्रिणा ॥ आत्मनः पार्श्वमानीतः । कृतश्च निरुपद्रवः ॥ ३२ ॥ गोपयित्वातियत्नेन । प्रज्ञातसमयेऽमुना ॥ अर्पितोऽमात्यवर्यस्य । गृहे नीत्वा सगौरवं ॥ ३३ ॥ भोजनाच्छादनप्रायै—रमात्योऽप्यस्य गौरवं ॥ चकार सदनस्यांत—र्गोपनं च दिवानिशं ॥ ३४ ॥ ततोऽसौ चिंतयामास । किमयं मम सत्क्रियां ॥ कुरुते च नवैव मां । यत्नाऽद्रक्षति मंदिरे ॥ ३५ ॥ पप्रच्छ सोऽन्यदामात्यं । तात वैदेशिकस्य मे ॥ सन्मानं किमिदं हंत । भवता क्रियतेऽधिकं ॥ ३६ ॥ किंनामैषा पुरी को वा ।

---

वन करतो बेठो छे ॥ ३१ ॥ तेटलामां मंत्रीए पूर्वे चेतवी राखेला मनुष्ये आवी ( तेने ) पोतानी पासे लीधो, अने उपद्रवरहित कर्यो. ॥ ३२ ॥ ( रात्रिना ) मानसहित तेणे पोताने घेर ( कुमारने ) लइ जइ अतिप्रयत्नथी छुपावी प्रधाने मंत्रिवर्यने सोंप्यो ॥ ३३ ॥ मंत्री पण तेनुं भोजन वस्त्रविगेरेथी गौरव करतो अने रात्रिदिवस घरनी अंदर छुपावी राखतो. ॥ ३४ ॥ त्यारे ते (कुमार) चिंतववा लाग्यो के आ मारो आटलो बधो सत्कार केम करे छे ? तथा मने घरमां आवीरीते यत्नथी केम राखे छे ? ॥ ३५ ॥ एक दिवसे तेणे प्रधानने पूछ्युं हे तात ! वैदेशिक एवा मारुं आप केम आवुं अधिक अधिक सन्मान करो छो ? ॥ ३६ ॥ आ पुरीनुं नाम शुं छे ?

देशः को वात्र नृपतिः ॥ तन्मे सत्यं समाख्याहि । विस्मयोऽत्र प्रवर्तते ॥ ३७ ॥ अमात्योऽप्यब्रवी- चंपा—नाम्नीयं नगरी वरा ॥ अंगाभिधानो देशोऽयं । राजात्र सुरसुंदरः ॥ ३८ मंत्री सद्बुद्धि- नामाहं । माननीयो महत्तमः ॥ मयानीतोऽसि वत्स त्वं । कारणेन गरीयसा ॥३९॥ त्रैलोक्यसुंदरीं नाम्ना । राज्ञः पुत्रीं विवाहय ॥ सा दत्ता मम पुत्राय । राज्ञा कुष्टी परं हि सः ॥ ४० ॥ परिणीय त्वया भद्र । विधिना सा नृपांगजा ॥ दातव्या मम पुत्राय । तदर्थं त्वामिहानयं ॥ ४१ ॥ तत श्रु-

---

अथवा आ देश कयो छे ? तथा अहीं कोण राजा छे ? ते मने सत्य कहो ? ( कारण के ) म- ने अहिं आश्चर्य थाय छे. ॥ ६७ ॥ अमात्य पण बोल्यो आ चंपा नामनी उत्तम नगरी छे, अंग नामनो देश छे. ( अने ) अहिं सुरसुंदर ( नामनो ) राजा छे. ॥ ३८ ॥ हुं ( तेनो ) मानीतो सुबुद्धि ( नामनो ) मोटो प्रधान छुं, ( अने ) हे वत्स ! हुं तने अहीं ( एक ) मोटा कारणथी लाव्यो छुं. ॥ ३९ ॥ तुं त्रैलोक्यसुंदरी नामनी राजानी पुत्रीने परण ? राजाए तेणीने मारा पु- त्रने आपी छे, पण ते कुष्टी छे. ॥ ४० ॥ ( तेथी ) तारे ते राजपुत्रीने विधिथी परणी मारा पु- त्रने सोंपी देवी ! हे भद्र एटलामाटेज तने हुं अहिं लाव्यो छुं. ॥ ४१ ॥ ते सांभळी मंगळकळश

त्वा मंगलोऽवोच—दकृत्यं किं करोष्यदः ॥ क्व सा रूपवती बाला । क्व कुष्ठरोगी क्व ते सुतः ॥४२॥
नेदं कार्यं करिष्यामि । कथंचिदपि निष्ठुरं ॥ कूपे क्षिप्त्वा जनं मुग्धं । वरत्राकर्तनोपमं ॥ ४३ ॥
मंत्र्यूचे चेन्न कर्मेदं । त्वं करिष्यसि दुर्मते ॥ तदा त्वां निजहस्तेन । मारयिष्यामि निश्चितं ॥४४॥
एवं निस्त्रिंशमाकृष्य । भणितोऽपि सुबुद्धिना ॥ अकृत्यं नानुमेने तत । स कुलीनशिरोमणिः ॥
॥४५॥ प्रधानपुरुषैर्मंत्री । निषिद्धस्तस्य मारणात ॥ अनाणि सोऽपि मन्यस्व । भद्र त्वं मंत्रिणो व-
चः ॥ ४६ ॥ ततोऽसौ चिंतयामास । भवितव्यमिदं खलु ॥ अन्यथोज्जयिनी क्वासौ । ममेहागम

बोल्यो तुं आवु अकृत्य शाने करे छे? क्यां ते रूपवती कन्या ? अने क्यां तारो कुष्टरोगी पुत्र ?
॥ ४२ ॥ हुं भोळाने कुवामां उतारी दोरडी कापी नाखवा जेवुं आ निष्ठुर कृत्य कोइ पण रीते
करीश नहि. ॥ ४३ ॥ ( त्यारे ) मंत्री बोल्यो हे दुर्मती! तो तने हुं खरेखर मारा हाथथी मारी
नांखीश. ॥ ४४ ॥ सुबुद्धि शस्त्र खेंचीने एरीते बोल्यो, तो पण ते कुलीन ( मंगळकळशे ) ते
अकृत्य कबुल कर्युं नहि. ॥ ४५ ॥ प्रधानना माणसोए मंत्रिने ( ते कुमारने ) मारवाथी निवा-
र्यो, अने ( कुमारने ) पण तुं मंत्रिनु वचन मान्य कर एम कह्युं. ॥ ४६ ॥ त्यारपछी ते चिंतव-

नं क च ॥ ४७ ॥ इदमाकाशवाचापि । दैवत्या कथितं तदा ॥ तत्करोम्यहमप्येवं । [illegible]
वत्वहो ॥ ४८ ॥ विचिंत्यैवं पुनः स्माह । मंगलो मंत्रिणंप्रति ॥ यद्यवश्यमिदं कार्यं । मया कर्त-
व्यमेव तत् ॥ ४९ ॥ तदाहमपि वः पार्श्वे । नाथ नायामि सर्वथा ॥ मह्यं ददाति यद्राजा । तन्नु
जातं ममैव तत् ॥ ५० ॥ युग्मं ॥ स्थापनीयं च तत्सर्व—मुज्जयिन्याः पुरोऽध्वनि ॥ एवमस्त्विति
तद्वाक्यं । मेने मंत्र्यपि बुद्धिमान् ॥ ५१ ॥ समासन्ने ततो लग्ने । हस्तिस्कंधाधिरोपितः ॥ स नि-

---

वा लाग्यो के खरेखर आमज थवानुं हशे, नहिंतर क्यां ते उज्जयनी ? अने क्यां आहिं मारुं आगमन ? ॥४७॥ वळी ते समये (कोइ) देवे पण आकाशवाणीथी आमज कह्युं छे. तथी हुं पण एमज करुं जे थवानुं होय ते थाउ. ॥ ४८ ॥ एवीरीते विचारी पुनः मंगळकळश बोल्यो जा आ कार्य मारे अवश्य करवानुं होय तो हुं कंइ तमारी पासे फोकटनुं सर्व ( काम ) करीश नहि. राजा मने जे वस्तुउ आपशे ते मारीज (थशे) ॥४९–५०॥ अने ते सघळुं उज्जयिनी नगरीना रस्तामां राखवुं. बुद्धिवान मंत्रीए पण एम थाउ ( एम कही ) तेनुं वचन कबुल कर्युं. ॥ ५१ ॥ त्यारपछी लग्न नजदीक आवतां हाथीना स्कंधपर चढेलो तथा वस्त्र आभूषण ( विगेरेथी ) भूषित

न्ये नृपतेः पार्श्वे । वस्त्राभरणभूषितः ॥ ५२ ॥ त्रैलोक्यसुंदरी साथ । दृष्ट्वा तं मन्मथोपमं ॥ अ
मंस्त तद्वरप्राप्त्या । कृतार्थं स्वं मनस्विनी ॥ ५३ ॥ ततश्च विप्रे पुण्याहं-पुण्याहमिति जल्पति ॥
चत्वारि परितो वह्नेर्भ्रमाते मंगलानि तौ ॥ ५४ ॥ प्रथमे मंगले राजा । चारुवस्त्राण्यनेकशः ॥
सुवर्णाभरणादीनि । वराय द्वितीये ददौ ॥ ५५ ॥ तृतीये मणिरत्नादि । चतुर्थे च रथादिकं ॥ जा
यापत्योस्तयोरित्थं । जज्ञे पाणिग्रहोत्सवः ॥ ५६ ॥ वरः समाप्तेऽप्युद्वाहे । वधूहस्तं न मुंचति ॥ त

थयेलो ( एवो ) ते राजापासे लइ जवायो. ॥ ५२ ॥ हवे ते त्रैलोक्यसुंदरी तने कामदेव जेवा
जोइ हर्षित थइ थकी ते वरनी प्राप्तिथी पोताने कृतार्थ मानवा लागी. ॥ ५३ ॥ त्यारपछी ब्राह्म
णथी पुण्याहं पुण्याहं एम बोलाते छते ते ( वर कन्या ) अग्निने फरता चार मंगलो फरवा ला
ग्या. ॥ ५४ ॥ पहेला मंगलमां राजाए वरने अनेक मनोहर वस्त्रो ( आप्यां, ) (अने) बीजामां
सोनानां अलंकार विगेरे आप्यां. ॥ ५५ ॥ त्रीजामां मणि रत्न विगेरे, अने चोथामां रथ विगेरे
( आप्यां. ) एवीरीते ते दंपतीना लग्नोत्सव थयो. ॥ ५६ ॥ ( परंतु ) लग्न समाप्त थये छते पण
वर कन्यानो हाथ मुक्तो नथी, ( त्यारे ) राजाए तेने पूछ्युं हे वत्स ! तने शुं आपुं ? ॥ ५७ ॥

वाच नृपतिस्तं च । वत्स य[illegible]म किं नु ते ॥ ५७ ॥ ततश्च याचितं तेन । जात्यघोटकपंचकं ॥
तत्तस्मै शीघ्रमेवासौ । प्रददौ प्रीतमानसः ॥ ५८ ॥ वाद्यमाने ततस्तूर्ये । स्फुरद्धवलमंगले ॥ मंत्रि-
णा स्वगृहं निन्ये । समं वध्वा स मंगलैः ॥ ५९ ॥ तदामात्यगृहजन-श्चक्रे उन्नमनाषत ॥ क-
थं निर्वास्यतेऽद्यापि । नायं वैदेशिको नरः ॥ ६० ॥ त्रैलोक्यसुंदरी साथ । चलचित्तं निजं पतिं
॥ ज्ञात्वेंगितैस्ततस्तस्यो—पांतं नैवामुचत्क्षणं ॥ ६१ ॥ ततः क्षणांतरेणासौ । देहचिंतार्थमुत्थितः
॥ जलपात्रं गृहीत्वाशु । तदनु प्राचलच्च सा ॥ ६२ ॥ कृतायामपि तस्यां च । शून्यचित्तं रहःस्थि-

---

त्यारे तेणे पांच उत्तम घोडा माग्या. ( राजाए पण ) प्रीतियुक्त चित्तवाळा ( थइने ) ते तुरतज
आप्या. ।५८। त्यारपछी वाजित्र वागते छते (तथा) धवलमंगल गवाते छते मंत्री ते मंगळकळशने
(तेनी वधूसहित) पोताने घेर लइ गयो. ॥५९॥ त्यां प्रधानना घरना माणसो छाना छाना बोलवा
लाग्या के हजुसुधी आ वैदेशिक पुरुष केम कढातो नथी ? ॥६०॥ हवे ते त्रैलोक्यसुंदरी पोताना
पतिने ( तेना ) चाळाउथी चंचळ चित्तवाळो जोइने तेनुं पडखुं (एक) क्षण (पण) मूकती नथी.
॥ ६१ ॥ त्यारबाद एक क्षणपछी ते जळनुं पात्र लइने वडीनीति माटे उठ्यो. तेणी पण तेनी पा-

तं उवाच प्रेयसी कांतं । बाधते त्वां क्षुधा नु किं ॥ ६३ ॥ आमेति भणितं तेन । दासीहस्तेन मोदकान् ॥ आनाय्य स्वगृहात्तस्मै । ददौ त्रैलोक्यसुंदरी ॥ ६४ ॥ भुक्तेषु तेषु पानीयं ॥ पिबता तेन भाषितं ॥ अहो रम्यतरा एते । मोदकाः सिंहकेसराः ॥ ६५ ॥ उज्जयिन्या नगर्याश्चे—न्नी-रमास्वाद्यतेऽमलं ॥ तदा तृप्तिर्भवेन्नूनं । मोदकेष्वशितेष्वपि ॥ ६६ ॥ तत् श्रुत्वा राजपुत्री सा । दध्यावाकुलचेतसा ॥ अहो अघटमानं किं । वाक्यमेष प्रजल्पति ॥ ६७ ॥ मातुलस्य गृहं नून—मयावंत्यां भविष्यति ॥ अस्य मे स्वामिनस्तेन । स्मृतिमागादिदं खलु ॥ ६८ ॥ ततश्च निज

---

बळ चाली. ॥ ६२ ॥ तेणीए एम करते छते पण शून्य चित्तवाळा ( तथा ) गुप्त रहेला (पोताना) पतिप्रत्ये बोली आपने शुं क्षुधा पीडती नथी ? ॥ ६३ ॥ तेणे कह्युं हा, ( त्यारे ) त्रैलोक्यसुंदरीए पोताने घेरथी दासीसाथे मोदक मंगावी ( तेने ) आप्या. ॥ ६४ ॥ ते खाधा पछी पाणी पीतां तेणे कह्युं अहो ! आ सिंहकेसरीयाउ बहु सुंदर छे. ॥ ६५ ॥ ( आ ) मोदक खाधा छतां जो उज्जयिनी नगरीनुं निर्मळ जळ पीवाय तो खरेखर तृप्ति थाय. ॥ ६६ ॥ ते सांभळी आकुळ चित्तवाळी कुंवरीए विचार्युं अहो ! आ अघटतुं वाक्य केम बोले छे ? ॥ ६७ ॥ खरेखर आ मारा

हस्तेन । मुखपाटवकारणं ॥ पंचसौगंधिकं तस्मै । तांबूलं दत्तवत्यमौ ॥ १० ॥ संध्याकाले पुनर्म-
न्त्रि—मानुषैः प्रेरितोऽथ सः ॥ त्रैलोक्यसुंदरीमेव—मूचे मतिमतां वरः ॥ ११ ॥ गमिष्यामि पुनर्दे-
ह—चिंतायामुदरार्त्तिनाक् ॥ त्वया क्षणांतरेणागं—तव्यमादाय पुष्करं ॥ १२ ॥ निरगात्स ततो
मंत्रि—मंदिरात् पुरुषांश्च तान् ॥ पप्रच्छ राजदत्तं नोः । क्वास्ति तद्वस्तु मामकं ॥ १३ ॥ तैश्च तद्दर्शि-
तं सर्व-मुज्जयिन्याः पथि स्थितं ॥ ततः सारतरं वस्तु । निक्षिप्याथ रथे वरे ॥ १४ ॥ तास्मिंश्च यो-

---

स्वामनु मोसाळनु घर उज्जयिनीमां हशे. तेथी आ याद आव्यु. ॥ ६७ ॥ त्यारपछी तेणीए पो-
ताना हाथथी मुख साफ करनारुं पांच सुगंधीवाळुं तांबूल आप्युं. ॥ १० ॥ संध्याकाळे उत्तम बु-
द्धिवाळो ते मंत्रिना माणसोथी प्रेरायेलो त्रैलोक्यसुंदरीप्रत्ये नीचे प्रमाणे बोल्यो. ॥ ११ ॥ मने
पेटनी पीडा छे, तेथी हुं पुनः देहचिंता माटे जाउं बुं, (अने) तारे थोडीवारपछी (पाणी-
नुं) पात्र लइने आववुं. ॥ १२ ॥ त्यारपछी ते मंत्रिने घेरथी नीकळ्यो. अने ते पुरुषोने पूछ्युं
के राजाए दीधेली ते मारी वस्तुओ क्यां छे? ॥ १३ ॥ तेओए पण उज्जयिनीना रस्तामां रहेलुं ते
सघळुं देखाड्युं, पछी सारसार वस्तु उत्तम रथमां नाखी तेने चार घोडा जोडी तथा एक पाळल

जयित्वाश्वां—श्चतुरः पृष्टतस्तथा ॥ बध्ध्वैकं वस्तु मुक्त्वा च । तत्रैव सोऽचलत्पुरः ॥ ७५ ॥ युग्मं ॥
पृष्टाश्चानेन ते ग्रामा । उज्जयिन्यध्वगाश्च ये ॥ मनुष्याणां ततस्तेऽपि । जगुस्तं नामपूर्वकं ॥७६॥
ततो रथाधिरूढोऽसौ । तेन मार्गेण बुद्धिमान् ॥ स्तोकैरेव दिनैः प्राप्त—स्तामेव नगरीं निजां ॥७७॥
इतश्च पितरौ तस्य । तमन्वेष्य विलप्य च ॥ बहुधा बहुभिर्घस्रै—र्गतशोकौ बभूवतुः ॥ ७८ ॥ गृ
हाभिमुखमायांतं । रथारूढं विलोक्य तं ॥ जगादाम्बाऽपरिज्ञाय । जनन्यस्य ससंभ्रमं ॥ ७९ ॥ प्रे
र्यते गृहमध्येन । राजपुत्र कथं रथः ॥ कर्तास्यभिनवं मार्गं । किं त्वं त्यक्त्वा पुरातनं ॥ ८० ॥

---

बांधी अने एक वस्तु त्यांज मूकी ते आगळ चाल्यो. ॥ ७४—७५ ॥ तेणे उज्जयिनीना मार्गमां
आवेला गामो ते माणसोने पूछी ( राख्या ) हता, (अने) तेउंए पण तेउंनां नाम कह्यां हतां.
॥ ७६ ॥ त्यारबाद ते बुद्धिवान ( कुमार ) रथमां चडीने तेज रस्तेथी थोडा दिवसमां पोतानी न
गरीमां आव्यो. ॥ ७७ ॥ हवे अहिं तेना माबापे तेने बहु शोधी, विलाप करी, घणा दिवसो थ·
वाथी लगभग शोक विनाना थया हता. ॥ ७८ ॥ हवे तेने रथपर चडी घरनी सामे आवतां जो·
इ तेनी माताए संभ्रम सहित उंळख्या विना कह्युं, ॥ ७९ ॥ हे राजपुत्र ! घरवच्चेथी केम रथ

चित्र सार्थ ७२

इत्थं निषिध्यमानेऽपि । न यावद्विरराम सः ॥ आचख्यौ श्रेष्ठिनस्तावत् । श्रेष्ठिन्याकुलिताशया ॥
॥ ८१ ॥ श्रेष्ठ्यप्यस्य निषेधार्थं । गृहाद्यावन्निरीयिवान् ॥ तावद्रथात्समुत्तीर्य । पितुः पादौ ननाम
सः ॥ ८२ ॥ उपलक्ष्य ततस्ताभ्या—माश्लिष्टस्तनयो निजः ॥ सद्यः प्रादुर्भवद्धर्षा—श्रुपूरप्लाविते-
क्षणं ॥ ८३ ॥ पप्रच्छ चोपविष्टोऽसौ । वत्सर्द्धिः कुत ईदृशी ॥ क्व च कालमियंतं त्वं । स्थितोऽसि
वद नंदन ॥ ८४ ॥ ततश्चात्मकथा तेन । पितुरग्रे निवेदिता ॥ वाक्श्रुत्यपहारादि—स्वस्थानागम

---

हांके छे ? शुं तु जुनो मार्ग मूकी नवो मार्ग करवानो छे ? ॥ ८० ॥ एवीरीते निषेध कर्या छतां
पण ज्यारे ते अटक्यो नहि त्यारे व्याकुळ थयेली शेठाणीए शेठने कह्युं. ॥८१॥ शेठ पण जेवो
तेने वारवाने घरनी बहार नीकळ्यो तेवामां तेणे रथमांथी उतरी पिताना पगने प्रणाम कर्या,
॥८२॥ त्यारे पोताना पुत्रने ओळखी तुरत हर्षनां आंसुओथी जेनां चक्षुओ भींजाइ गयां छे (एवा)
ते बन्ने ( तेने ) भेटी पड्या. ॥ ८३ ॥ ( त्यारपछी ) ( शेठे ) बेसीने पूछ्युं हे वत्स ! आटली
बधी समृद्धि क्यांथी ? तथा हे पुत्र आटलो वखत तुं क्यां रह्यो हतो ? ते ( अमोने ) कहे ? ॥
॥ ८४ ॥ त्यारे तेणे आकाशवाणीनुं सांभळवुं तथा ( पोताना ) हरणथी मांडी पोताने वेर आ-

नावधि ॥ ७५ ॥ अहो पुत्रस्य सौभाग्य-महो पुत्रस्य दक्षता ॥ अहो धैर्यमहो भाग्य—मिति प्राशंसतामिमौ ॥ ७६ ॥ ततः प्राकारसंयुक्तं । स स्वं गेहमकारयत् ॥ अश्वानां रक्षणार्थं च । मंदुरादिनियंत्रणं ॥ ७७ ॥ सोऽन्येद्युर्जनकं स्माह । मम तात कलागमः ॥ न्यूनोऽस्त्यद्यापि संपूर्णं । करिष्यामि त्वदाज्ञया ॥ ७८ ॥ ततश्चानुमतः पित्रा । कलाचार्यस्य सन्निधौ ॥ कलाभ्यासं चकारासौ । स्वकीयसदनांतिके ॥ ७९ ॥

---

थ्यो, त्यांसुधीनी ( सघळी ) पोतानी कथा पितापासे कही. ॥ ७५ ॥ त्यारे ते बन्ने अहो! पुत्रनुं सौभाग्य! अहो! पुत्रनी चतुराइ! अहो! धैर्य! अहो! भाग्य एम ( बोली ) प्रशंसवा लाग्यां. ॥ ७६ ॥ त्यारबाद तेणे प्राकारवाळुं पोतानुं घर तथा अश्वोनां रक्षणमाटे मंदुरनियंत्रण विगेरे बनाव्युं. ॥ ७७ ॥ एक दिवस तेणे पिताने कह्युं हे तात! अद्यापि मारो कळाभ्यास अपूर्ण छे, ते हुं आपनी आज्ञाथी पूर्ण करुं. ॥ ७८ ॥ त्यारपछी पिताथी आज्ञा देवायेला एवा तेणे पोताना घरनी पासे कळाचार्यसमीपे कळाभ्यास कर्यो. ॥ ७९ ॥

हवे अहिं ते मंत्रीए रात्रीए पोताना पुत्रने मंगळकळशनो वेश पहेरावी वधूपासे वासभुवन-

इतश्च मंत्रिणा तेन । रात्रौ मंगलवेशभृत ॥ प्रेषितो वासभुवने । वधूपांते सुतो निजः ॥ ॥ ९० ॥ शय्यारूढं च तं दृष्ट्वा । दध्यौ त्रैलोक्यसुंदरी ॥ कोऽयं कुष्टाभिभूतांगः । समायातो म मांतिके ॥ ९१ ॥ करस्पर्शमथो कर्तु—मुद्यतेऽस्मिन् झटित्यपि ॥ सा शय्यायाः समुत्थाय । निर्य यौ भुवनाद्बहिः ॥ ९२ ॥ दासीभिर्जल्पिता किं नु । स्वामिन्यसि ससंभ्रमा ॥ सावदद्देवतारूपो । गतः क्वापि स मे पतिः ॥ ९३ ॥ प्रत्यूचुस्ता इदानीं स । प्रविष्टोऽत्र पतिस्तव ॥ साब्रवीन्नास्त्यसावत्र । कुष्टी कोऽपि स विद्यते ॥ ९४ ॥ दासीमध्ये ततः सुप्ता । तामतीत्य विभावरीं ॥ त्रैलोक्यसुंदरी प्रा

---

मां मोकल्यो. ॥ ९० ॥ त्रैलोक्यसुंदरी तेने शय्यापर चडेलो जोइ विचारवा लागी आ कोढीओ कोण मारी पासे आव्यो ? ॥ ९१ ॥ हवे जेवो ते ( तेणीनो ) करस्पर्श करवा जाय छे तेवामां ते ( कुंवरी ) तुरत जागी थइ भुवननी बाहेर नीकळी. ॥ ९२ ॥ ( त्यारे ) दासीओ बोली हे स्वामिनी ? तुं व्याकुळ केम छु ? ते बोली देवजेवो मारो पति क्यांक चाल्यो गयो. ॥ ९३ ॥ ( त्यारे ) तेओए जवाब आप्यो के ते तारो पति हमणाज गयो, कुमारी बोली ( ते मारो ) पति नथी ते तो कोइ कुष्टी छे. ॥ ९४ ॥ त्यारपछी ते त्रैलोक्यसुंदरी दासीओ भेगी सूती अने ते रात्री त्यां

त—र्ययौ पितृगृहं निजं ॥ ७५ ॥ सुबुद्धिरपि दुर्बुद्धिः । सोऽथ मंत्री महीपतेः ॥ ययौ समिपम-न्येद्यु—श्चिंताश्यामसुखः किल ॥ ७६ ॥ कृतप्रणतिमासीन—मप्राक्षीनं पृथिवीपतिः ॥ हर्षस्थाने विषादः किं । तवेत्यूचे कृताग्रहः ॥ ७७ ॥ स जगाद महाराज । विचित्रा कर्मणां गतिः ॥ अस्माकं मंदभाग्याना—मागता विपदोऽधुना ॥ ७८ ॥ चिंतयत्यन्यथा जीवो । हर्षपूरितमानसः ॥ विधिस्त्वेष महावैरी ॥ कुरुते कार्यमन्यथा ॥ ७९ ॥ राजा प्रोवाच हे मंत्रि—न्नुक्त्वा स्वदुःखकारणं ॥ मामप्यमुष्य दुःखस्य । संविभागयुतं कुरु ॥ ४०० ॥ निःश्वस्य सचिवोऽप्यूचे । देव दैवं करोति यत्

---

पसार करी प्रजाते पोताना पिताने घेर गइ. ॥ ७५ ॥ बीजे दिवसे ते सुबुद्धि पण दुर्बुद्धिवाळो तथा चिंताथी श्याममुखवाळो थयो थको राजानी पासे गयो. ॥ ७६ ॥ हवे राजाए तेने प्रणाम करीने बेठेलो जोइ आग्रह करी पूछ्युं तने हर्षने स्थाने विषाद केम (थाय छे?) ॥ ७७ ॥ ते बोल्यो हे महाराज! कर्मनी गति विचित्र छे, अमोने मंदभागीओने हमणा आपत्ति आवी (पडी छे.) ॥ ७८ ॥ हर्षित चित्तवाळो जीव चिंतवे छे कइक, अने महावैरी (एवो) विधि ते कार्य निष्फळ करे छे. ॥ ७९ ॥ (त्यारे) राजा बोल्यो हे मंत्रिन्! तारा दुःखनुं कारण मने कही ते

तद्वक्तुमपि नो शक्य—मश्रद्धेयं च शृण्वतां ॥ १ ॥ स्वामिपादैः सप्रसादै—र्दत्ता पुत्री ममात्मजे ॥ तस्यां तु परिणीतायां । यज्जातं तन्निशम्यतां ॥ २ ॥ यादृग् राज्ञा स्वयं दृष्ट—स्तादृगेव सुतो मम ॥ अधुना कुष्टरोगार्त्तो । दृश्यते क्रियते नु किं ॥ ३ ॥ तत श्रुत्वा नृपतिर्दध्यौ । सा नूनं मम नंदिनी ॥ कुलक्षणा यया स्पृष्टः । कुष्टी जातोऽस्य पुत्रकः ॥ ४ ॥ स्वकर्मफलभोक्तारः । सर्वे जाति जंतवः ॥ अयं हि निश्चयनयो । यद्यप्यस्ति जिनोदितः ॥ ५ ॥ तथापि व्यवहारोऽयं । यो हे-

---

दुःखनो भागीदार बनाव. ॥ ४०० ॥ मंत्री पण निःश्वास नाखी बोल्यो हे देव जे दव करे छे ते कही पण शकातु नथी, अने श्रद्धा ( पण आवती ) नथी, ( हवे ) ते सांभळो ? ॥ १ ॥ आपे प्रसाद करी मारा पुत्रने आपनी पुत्री आपी, पण तेने परणतां जे बन्यु ते सांभळो. ॥ २ ॥ आपे मारा पुत्रने जेवो जोयो तेवोज हतो ( पण ) हमणा कुष्ट रोगथी पीडाय छे, हवे शुं करवुं ? ॥ ३ ॥ ते सांभळी राजाए विचार्यु खरेखर ते मारी पुत्री कुलक्षणी छे, के जेणीने स्पर्श करवाथी आ ( प्रधाननो ) पुत्र कुष्टी थयो. ॥ ४ ॥ जगतमां सर्वे प्राणीओ पोताना कर्मना फळ भोगवनारा ( होय छे ) एवो जो के जिनेश्वरनो कहेलो निश्चयनय छे, तो पण आ व्यवहार छे के जे सुख

तुः सुखदुःखयोः ॥ स एव क्रियते लोकै—र्भाजनं गुणदोषयोः ॥ ६ ॥ युग्मं ॥ स्वकर्मपरिणामे-
न । जज्ञे पुत्रोऽस्य कुष्टिकः ॥ जाता च तन्निमित्तत्वात् । पुत्री मे दुःखभाजनं ॥ ७ ॥ ऊचे त्र स-
चिवानार्य—मकार्षमहमीदृशं ॥ नादास्यं चेदहं पुत्रीं । कुष्टी न स्यात्सुतोऽपि ते ॥ ८ ॥ अमा-
त्योऽप्यब्रवीत्स्वामिन् । हितं कार्यं प्रकुर्वतां ॥ को दोषो भवतामत्र । दोषो मत्कर्मणां पुरः ॥ ९ ॥
अथोत्थाय गतो मंत्री । सा तु त्रैलोक्यसुंदरी ॥ इष्टाप्यनिष्टा संजाता । राज्ञः परिजनस्य च ॥१०॥
आलपाप न कोऽप्येना—मीक्षते तां दृशापि न ॥ एकत्र गुप्तगेहेऽस्थात् । सा मातृगृहगृप्टनः ॥

---

दुःखनो हेतु ( होय छे ) तेनेज लोको गुणदोषनु भाजन करे छे. ॥ ५–६ ॥ आनो पुत्र पो-
ताना कर्मना परिणामथी कुष्टी थयो, अने तेना निमित्तथी मारी पुत्री दुःखी थइ. ॥ ७ ॥ (पछी)
ते बोल्यो हे प्रधान ! में आ अकृत्य कर्यु छे. जो में मारी पुत्री दीधी न होत तो तारो पुत्र पण
कुष्टी न थात. ॥ ८ ॥ प्रधान पण बोल्यो हे स्वामिन् ! हितकार्य करनारा एवा आपनो आहिं शो
दोष ? मारा कर्मनोज दोष छे. ॥ ९ ॥ पछी ते मंत्री उठीने गयो. ( अने ) ते त्रैलोक्यसुंदरी
इष्ट पण राजाने अने परिवारने अनिष्ट थइ. ॥ १० ॥ कोइ एनी साथे बोलतुं नहि, ( तेमज )

॥ ११ ॥ अचिंतयच्च दुःकर्म । पुरा यद्विहितं मया ॥ तेन कापि ययौ नष्ट्वा । परिणीतः स मे प
तिः ॥ १२ ॥ अन्यच्च लोकमध्ये मे । कलंकः समुपस्थितः ॥ किं करोमि क्व गच्छामि । व्यसने प
तितास्मि हा ॥ १३ ॥ एवं चिंतां प्रकुर्वत्या— स्तस्याश्चित्ते स्मृतं तदा ॥ भवितोज्जयिनीपुर्याः । प्रा
प्तो नूनं स मे पतिः ॥ १४ ॥ तदा च मोदकांस्तेन । भुक्त्वा संजल्पितं किल ॥ एते हि मोदका
रम्याः । किंत्ववंत्या जलोचिताः ॥ १५ ॥ ततः केनाप्युपायेन । तत्र गच्छाम्यहं यदि ॥ तदा तं हि

---

आंखथी पण (कोइ) जोतु नहि. तेथी माताना घरनी पाछळ ते गुप्त गृहमां रही. ॥ ११ ॥ अने
चिंतववा लागी के में पूर्वे जे दुःकर्म कर्यु छे तेनाथी ते मारो परणेलो पति क्यांक नाशी गयो.
॥१२॥ वळी लोकमां मारापर कलंक आव्यु अरेरे! हुं शु करु? क्यां जाउं? हु तो दुःखमां पडी
छुं. ॥ १३ ॥ एवी रीते चिंता करतां तेणीना चित्तमां याद आव्यु के खरेखर ते मारो पति उज्ज
यिनीपुरीनो होवो जोइए. (कारणके) ते समये तेणे मोदक खाइने कह्यु हतुं के खरेखर आ
मोदक सुंदर छे, परंतु ते उज्जयिनीनां पाणीने योग्य छे. ॥ १५ ॥ तेथी जो कोइ पण उपायथी
हुं त्यां जाउं तो त्यां तेने मळी सुखी थाउं. ॥ १६ ॥ एक दिवस ते (पोतानी) माता प्रत्ये बोली

मित्रित्वाहं । चवामि सुखनागिनी ॥ १६ ॥ अथान्येद्युरवक् सांबां । हे मातर्जनको मम ॥ एकवारं
यथा वाक्यं ।शृणोति त्वं तथा कुरु ॥ १७ ॥ तां दृष्ट्वानादरपरा—मन्येद्युः सिंहनामकं ॥ सामंतं
ज्ञापयामास । सा नमय्य कृतांजलिः ॥ १८ ॥ सोऽथ राजकुले गत्वा । नृपं नत्वोपविश्य च ॥ इति
विज्ञपयामास । प्रस्तावे ददतां वरः ॥ १९ ॥ नृपाथ जवतां मान्या । कन्या संप्रत्यसंमता ॥ वराकी
वर्तते कष्टे—नैषा त्रैलोक्यसुंदरी ॥ २० ॥ अस्याः सन्मानदानादि । दूरेऽस्त्वालापनं तदा ॥ वाक्य-
श्रवणमात्रेण । प्रसादोऽद्य विधीयतां ॥ २१ ॥ पार्थिवोऽथाश्रुपूर्णाक्षः । प्रोचे सिंह पुरा जवे ॥ अ

---

हे माता ! मारो पिता एकवार मारुं वचन सांभळे तेम कर ? ॥१७॥ तेणीने अनादरवाळी जोइने
एक दिवसे ( तेनी माताए ) हाथ जोडी. सिंह नामना सामंतने विनंती करी. ॥ १८ ॥ तेणे रा-
जकुळमां जइ राजाने नमी ( तेनीपासे ) बेसी प्रस्तावे ( राजाए ) वरदान आपतां नीचे प्रमाणे
विनंती करी. ॥ १९ ॥ हे राजा आपनी मानिती परंतु हमणा अपमानिती ( थयेली ) त्रैलो-
क्यसुंदरी पुत्री दुःखथी बेभान जेवी रहे छे. ॥ २० ॥ तेणीनु सन्मान आदर तथा वातचीत दूर र-
हो ( पण ) आजे तेनुं मात्र ( एक ) वचन सांभळवानो प्रसाद करो. ॥ २१ ॥ राजा पण अ

नया विहितं किंचि--दन्याख्यानादिदुष्कृतं ॥ २२ ॥ सा तत्कर्मप्रभावेण । कलंकिततनूरभूत् ॥
इष्टाप्यनिष्टतां प्राप्ता । गाढमस्माकमप्यहो ॥ २३ ॥ वाक्यं तदद्य यत्किंचि—द्वक्तुं सा मे समीहते
॥ वदतु तत्सुखेनेय--मत्रागत्य विचक्षण ॥ २४ ॥ ततस्तदनुमत्यैत्य । तत्र त्रैलोक्यसुंदरी ॥ उ-
वाच तात मे वेषं । कुमारोचितमर्पय ॥ २५ ॥ भूयो राजाब्रवीत्सिंह । किमिदं वत्सया वचः ॥
साऽवदद्देव युक्तं हि । क्रमोऽस्ति यदयं किल ॥ २६ ॥ राज्ञां गृहेषु चेत्पुत्री । गुरुकार्येण केनचित्
याचते यदि पुंवेषं । दातव्योऽस्यै तदा हि सः ॥ २७ ॥ ततस्तदनुमत्यास्यै । पुंवेषं पार्थिवो ददौ ॥

---

श्रुपूर्ण नेत्रवाळो थयो थको बोल्यो हे सिंह! एणे पूर्वभवे कलंक विगेरे कांइक खराब कृत्य क-
रेल छे. ॥ २२ ॥ ते कर्मना प्रभावथी कलंकित शरीरवाळी थइ छे. ( तेथी ) अमोने प्रिय पण
बहु अप्रिय थइ पडी छे. ॥ २३ ॥ तेथी हे विचक्षण ! ते जे कांइ मने कहेवाने इच्छती होय ते
आजे अहिं सुखेथी मने कहे. ॥ २४ ॥ त्यारपछी त्रैलोक्यसुंदरी तेनी अनुमतिथी त्यां आवी बो-
ली हे तात! मने कुमारजेवो वेष आपो? ॥ २५ ॥ पुनः राजा बोल्यो हे सिंह! आ शुं वचन
बोले छे? ते बोल्यो हे देव! ते युक्त ( कहे ) छे, एवोज क्रम छे के ॥२६॥ राजाना घरमां पुत्री

आदिदेश च तं सिंहं । तद्रक्षार्थं बलान्वितं ॥ २८ ॥ जगादाथ कुमारी सा । तातास्ति चेद्भवेत्तव ॥ उज्जयिन्यां तदा यामि । कारणेन गरीयसा ॥२९॥ कारणं कथयिष्यामि । जाते मेऽथ मनीहिते ॥ अधुना कथिते तस्मिन् । परिणामो न शोभनः ॥ ३० ॥ पुत्रिके मम वंशस्य । यथा नान्येति दूषणं ॥ तथा कार्यं त्वयेत्युक्त्वा । विसृष्टा सा महीभुजा ॥ ३१ ॥ ततश्च सिंहसामंत—भूरिसैन्यसमन्विता ॥ अखंडितप्रयाणैः सा । ययावुज्जयिनीं पुरीं ॥ ३२ ॥ वैरिसिंहो नृपोऽप्येवं ।

---

जो कोइ मोटा कार्यथी पुरुषवेष मागे तो त तेणीने आपवो. ॥ २७ ॥ पछी तेनी अनुमतिथी राजाए तेणीने पुरुषनो वेष आप्यो, अने सिंहने लश्कर सहित तेणीना रक्षणमाटे हुकम आप्यो. ॥ २८ ॥ हवे कुमारी बोली हे पिताजी ! जो आपनी आज्ञा थाय तो हुं (एक) मोटा कारणथी उज्जयिनीमां जाउं. ॥२९॥ मारुं इच्छित पूर्ण थतां हुं कारण कहीश, हमणा ने कहेवाथी परिणाम सारुं न (आवे) ॥३०॥ हे पुत्री ! मारा वंशने दुषण न लागे तेम तारे करवुं एम कही राजाए तेने विसर्जन करी. ॥ ३१ ॥ पछी ते सिंहसामंत तथा घणा सैन्य सहित अखंड प्रयाणो करी उज्जयिनी नगरीमां आवी. ॥ ३२ ॥ वैरिसिंह राजाए पण लोकोनां मुखथी सांभ

शुश्राव जनतामुखात् ॥ यच्चंपायाः समागच्छ–न्नत्यत्र नृपनंदनः ॥ ३३ ॥ अभियानादिसन्मान—
—स्वागतप्रश्नपूर्वकं ॥ पुरीं प्रावेश्य तेनासा—वानीता निजमंदिरे ॥ ३४ ॥ पृष्टा चागमनार्थं सा ।
प्रोवाच नगरीमिमां ॥ दृष्टुमाश्चर्यसंपूर्णा—मागतास्मि कुतूहलात् ॥ ३५ ॥ ततः सोक्ता नरेंद्रेण
। त्वया स्थेयं ममौकसि ॥ सुरसुंदरराजस्य । मम गेहस्य नांतरं ॥ ३६ ॥ राजढौकितगेहे सा । त-
स्थौ सबलवाहना ॥ पत्तीश्चेंत्यादिशत्स्वादु—नीरस्थानं निरीक्ष्यतां ॥ ३७ ॥ पूर्वस्यां दिशि ते तत्तु
। ज्ञात्वा तस्यै न्यवेदयन् ॥ तन्मार्गे कारितावासे । सावसच्च नृपाज्ञया ॥ ३८ ॥ गच्छतो नीरपाना

---

च्युं के चंपानगरथी राजपुत्र अहीं आवेल छे. ॥ ३३ ॥ ( त्यारे ) तेणे सामयां विगेरे सत्कार त-
था स्वागत पूछी तेणीने पोताने घेर ते लइ गयो. ॥ ३४ ॥ आगमनकारण पूछतां ते बोल्यो
कुतूहलथी आश्चर्यपूर्ण आ नगरी जोवा आव्यो छुं. ॥ ३५ ॥ त्यारे राजा बोल्यो तारे मारे घेर
रहेवुं ( कारणके ) सुरसुंदर राजाने अने मारा घरने कांइ जुदाइ नथी. ॥ ३६ ॥ ते पण ( पो
ताना) सैन्यसहित राजाना आपेला घरमां रही, अने सुभटोने आज्ञा करी के ( कोइ ) स्वादिष्ट
जलाशय शोधी काढाओ. ॥ ३७ ॥ तेओए तेवुं ( जलाशय ) पूर्व दिशामां जाणी तेणीने कह्युं,

र्थ—मन्यदाश्वान्निरीक्ष्य तान् ॥ मा दध्यौ मम तातस्य । सत्का एते तुरंगमाः ॥ ३९ ॥ तेषामनुपदं प्रेष्य । पुनर्भृत्यान् विवेद सा ॥ भर्तृगृहाभिधानादि-सर्वशुद्धिं मनस्विनी ॥ ४० ॥ ज्ञानाभ्यासपरं तं च । ज्ञात्वा त्रैलोक्यसुंदरी ॥ उवाच सिंह भर्ता मे । दृष्टव्योऽत्र कथं वद ॥ ४१ ॥ सिंहस्यानुमतेनाथ । कुमारी सा विचक्षणा ॥ सछात्रं तं कलाचार्यं । भोजनाय न्यमंत्रयत ॥ ४२ ॥ भोजनार्थमुपाध्याये । तत्रायाते ददर्श सा ॥ छात्रमध्ये स्वभर्तारं । हृदयानंददायिनं ॥ ४३ ॥ त-

---

ते पण राजानी आज्ञाथी आवास बनावी तेना मार्गमां रही. ॥ ३८ ॥ एक दिवस ते अश्वोने पाणी पीवा जता जोइ तेणीए विचार्युं के आ अश्वो मारा पिताना छे. ॥ ३९ ॥ तेओनी पाछळ ते चतुराए पुनः नोकर मोकली पतिनुं घर नाम विगेरे सर्व खबर मेळवी लीधी. ॥ ४० ॥ तेने ज्ञानाभ्यास करतो जाणी त्रैलोक्यसुंदरी सिंहप्रत्ये बोली मारा पतिने केवीरीते जोवो ते कहे? ॥ ४१ ॥ हवे सिंहनी अनुमतिथी ते विचक्षण कुमारीए छात्रोसहित ते कळाचार्यने भोजनमाटे निमंत्रण कर्युं. ॥ ४२ ॥ भोजनमाटे उपाध्याय त्यां आवतां तेणीए विद्यार्थिओमां हृदयने आनंद आपनारा पोताना पतिने जोयो. ॥ ४३ ॥ तेने तेणीए पोतानुं आसन तथा पोतानी थाळी

स्मा आसनमात्मीयं । स्थालं सादापयत्तथा ॥ अकारयद्विशेषेण । गौरवं भोजनादिषु ॥ ४४ ॥ ततो वस्त्राणि सर्वेभ्यो । यथायुक्तमदत्त सा ॥ तस्मै निजांगलग्नं च । वासोयुग्मं मनोहरं ॥ ४५ ॥ सोवाचाथ कलाचार्य—मेतन्मध्यात्त्वदाज्ञया ॥ यो जानाति स आख्यातु । छात्रो मम कथानकं ॥ ४६ ॥ सर्वैरपीर्ष्यया छात्रै—र्निर्दिष्टोऽथ स मंगलः ॥ उपाध्यायाज्ञया धीमान् । वक्तुमेवं प्रचक्रमे ॥ ४७ ॥ अनुभूतं चरित्रं वा । कथयामि कथानकं ॥ सावदच्चरितं ब्रूहि । पर्याप्तं कल्पितेन नोः ॥ ४८ ॥ मंगलश्चिंतयामास । सैषा त्रैलोक्यसुंदरी ॥ चंपापुर्यां नाटकेन । परिणीता हि या मया

---

आपी, (अने) भोजन विगेरेमां (तेनुं) विशेष गौरव कर्युं. ॥ ४४ ॥ पछी तेणीए सर्वने यथोचित वस्त्रो दीधां, अने तेने पोताने अंगे लागेलां बे मनोहर वस्त्रो आप्यां ॥ ४५ ॥ (पछी) तेणे कलाचार्यने कह्युं के आमांथी जे विद्यार्थी वार्ता जाणतो होय ते मने आपनी आज्ञाथी कहे. ॥ ॥ ४६ ॥ त्यारे सर्व विद्यार्थीओए इर्ष्याथी मंगळकळशने देखाड्यो, बुद्धिवान् (एवो ते पण) उपाध्यायनी आज्ञाथी नीचे प्रमाणे बोलवा लाग्यो. ॥ ४७ ॥ अनुभवेल चरित्र (कहुं) के कथानक कहुं? ते बोली अरे कल्पित (वातथी) सर्युं. चरित्र कहे? ॥ ४८ ॥ मंगळकळश चिंतव

॥ ४९ ॥ केनापि हेतुनेहागा—हृत्वा पुंवेषधारिणी ॥ कथयामि ततो नूनं । स्वानुभूतां कथामहं ॥ ५० ॥ सोऽवदद्या कथा लोके । प्रिया चित्रकरी भवेत् ॥ स्वकीयामहमेनां तां । कथयामि निशम्यतां ॥ ५१ ॥ ततश्चात्मकथा तेना—दितस्तव प्रकाशिता ॥ तावद्यावदमात्येन । गृहान्निर्वासितो ह्यसौ ॥ ५२ ॥ अत्रांतरे कृतालीक—कोपा राजसुतावदत् ॥ अमुं गृह्णीत गृह्णीत । रेरे मिथ्याप्रवादिनं ॥ ५३ ॥ इत्युक्ते पत्तयस्तस्या—स्तद्गृहार्थं समुद्यताः ॥ तयैव वारिताः शीघ्रं । स चा·

---

वा लाग्यो के ते आ त्रैलोक्यसुंदरी छे के जणीने हुं चंपापुरीमां भामांथी परणेल हतो. ॥४९॥ ते अहिं कोइ कारणथी पुरुषवेष धरी आवी (लागे छे), तेथी खरेखर हुं मारी पोतानी अनुभवेली कथा कहुं. ॥ ५० ॥ ते बोल्यो जे कथा लोकमां प्रिय (अने). आश्चर्य करनारी थाय एवी हुं मारी वार्ता कहुं छुं, (ते सांभळो ?) ॥ ५१ ॥ पछी तेणे पहेलेथी ते प्रधाने घरमांथी काढी मूक्यो त्यांसुधीनी (सघळी वार्ता) कही. ॥ ५२ ॥ त्यारे खोटो गुस्सो करी राजपुत्री बोली अरे! आ असत्यवादीने पकडो पकडो ! ॥ ५३ ॥ एम कहेतां तेणीनां सुभटो तेने पकडवाने तैयार थया (पण) तरतज तेणी तेओने निवारी ते (कुमारने) घरनी अंदर लइ गइ. ॥५४॥

नीतो गृहांतरे ॥ ५४ ॥ अथैनमासनेऽध्यास्य । सिंहमूचे नृपांगजा ॥ भद्र येनाहमूढास्मि । स
एवायं प्रियो मम ॥ ५५ ॥ किमत्र युज्यते कर्तु—मित्युक्तः सोऽपि चाब्रवीत ॥ अयं हि तव चे-
द्भर्ता । तदा सेव्यो ह्यशंकितं ॥ ५६ ॥ सोचे सिंह तवाद्यापि । चित्ते यद्यपि संशयः ॥ तदास्य
मंदिरे गत्वा । स्थालादीनि विलोकय ॥ ५७ ॥ तथा कर्तुमथो सिंहो । धनदत्तगृहं ययौ ॥ स तु
छात्रमुखात्पुत्रा—पदं श्रुत्वाकुलोऽभवत् ॥ ५८ ॥ पुत्रस्य गौरवं दत्त—माख्यायैतेन बोधितः ॥ द-
र्शयामास स स्थाला—दीनि तस्य विवेकतः ॥ ५९ ॥ वध्वाः स्वरूपकथने—नाह्वाय श्रेष्ठिनं

---

(त्यां) तने आसनपर बेसाडी कुमारी सिंह प्रत्ये बोली हे भद्र! जे मने परण्यो छे ते आज
मारो प्रिय छे. ॥ ५५ ॥ अहिं शुं करवुं युक्त छे? एम पूछवाथी ते पण बोल्यो के आ जो तारो
पति होय तो (तारे तेने) निःसंशय सेववो. ॥५६॥ ते बोली हे सिंह! तने अद्यापि चित्तमां जो
संशय होय तो एने घेर जइ थाळीओ विगेरे जोइ आव? ॥५७॥ तेम करवाने सिंह पण धनदत्त
ने घेर गयो, ते (श्रेष्ठी) तो विद्यार्थीने मोढेथी पुत्रनी विपत्ति सांभळी आकुल थयो हतो. ॥५८॥
तेने पुत्रना गौरव विगेरे कही शांत कर्यो. श्रेष्ठीए पण तेने विवेकथी थाळीओ विगेरे (वासणो)

ततः ॥ सिंहः पुना राजपुत्र्याः । समीपं समुपाययौ ॥ ६० ॥ सिंहेनानुमता साथ । कृत्वा स्त्रीवेष मद्भुतं ॥ बभूव वल्लभा तस्य । मंगलस्य महात्मनः ॥ ६१ ॥ ययौ च श्रेष्टिनो वेश्म । तद्युग्मं पार्थिवोऽपि तत् ॥ आकार्य सर्ववृत्तांतं । पृष्ट्वा श्रुत्वा विसिस्मये ॥ ६२ ॥ ततस्तत्रैव सौधे स । गत्वा राजाज्ञया पुनः ॥ समं त्रैलोक्यसुंदर्या । विललासाथ मंगलः ॥ ६३ ॥ सुदर्या प्रेषितः सोऽथ । सिंहः सबलवाहनः ॥ लात्वा पुरुषवेषं तं । ययौ चंपापुरीं पुनः ॥ ६४ ॥ तेनाथ सर्ववृत्तांते । क-

---

देखाड्यां. ॥ ५९ ॥ पछी सिंह शेठने वहुनु वृत्तांत कही आनंद पमाडी पुनः राजपुत्रीपासे आव्यो. ॥ ६० ॥ हवे तेणी सिंहनी अनुमतिथी अद्भुत स्त्रीवेष करी महापुरुष एवा मंगलनी प्रिया थइ. ॥ ६१ ॥ (त्यारपछी) ते जोडुं शेठने घेर गयुं. राजाए पण तेने बोलावी सर्व वृत्तांत पूछ्यो (अने ते) सांभळी आश्चर्य पाम्यो. ॥ ६२ ॥ पछी राजानी आज्ञाथी पुनः तेज महेलमां जइ त्रैलोक्यसुंदरीसाथे मंगळकळश आनंद भोगववा लाग्यो. ॥ ६३ ॥ हवे सैन्यसहित तथा ते पुरुषवेष लइने कुमारीए मोकलेलो सिंह पुनः चंपापुरीमां गयो. ॥ ६४ ॥ (त्यां राजाने) सर्व वृत्तांत कहेतां आनंद पामेलो महीपति बोल्यो अहो! मारी पुत्रीनी मतिकुशळता! ॥ ६५ ॥ अ-

थिते जगतीपतिः ॥ हृष्टोऽत्राषिष्ट वत्सया । अहो मे मतिकौशलं ॥ ६५ ॥ अहो कुधीरमात्यस्य । पापकर्मविधायिनः ॥ येनादोषापि मत्पुत्री । सदोषा विहिता हहा ॥ ६६ ॥ सिंहं पुनरपि प्रेष्यो—ज्जयिन्यां निजनंदिनीं ॥ समानाययदवनीपालः । संजातोऽतीवहर्षभाक् ॥ ६७ ॥ अमात्यं धारयित्वा च । मार्यमाणं महीभुजा ॥ मंगलो मोचयामास । गाढाभ्यर्थनया नृपात् ॥ ६८ ॥ जामातुरुपरोधेन । मया मुक्तोऽसि पाप रे ॥ इति चोक्तवता राज्ञा । सोऽथ निष्कासितः पुरात् ॥ ६९ ॥ अपुत्रः सोऽथ भूपालो । मत्वा जामातरं सुतं ॥ तत्रैवानाययामास । तन्मातापितरावपि ॥ ७० ॥

---

रेरे ! पाप कर्म करनार मंत्रिनी दुर्बुद्धि के जणे निर्दोष एवी पण मारी पुत्रीने सदोष बनावी. ॥ ॥ ६६ ॥ ( पछी ) राजा सिंहने पुनः उज्जयिनीमां मोकली पोतानी पुत्रीने बोलावी अति हर्षित थयो. ॥ ६७ ॥ राजाए मारवामाटे पकडेला मंत्रीने मंगळकळशे बहुज प्रार्थनाथी राजा पासेथी मूकाव्यो. ॥ ६८ ॥ हे पापी ! जमाइना मानथी हुं तने मुकुं छुं एम बोली राजाए तेने शहेर बहार काढी मूक्यो. ॥ ६९ ॥ हवे ते अपुत्र्या राजाए ( पोताना ) जमाइने पुत्र तरीके मानी तेना मातापिताने पण त्यांज बोलाव्या. ॥७०॥ एक दिवस तेणे मंत्री अने सामंतोनी अनुम-

अन्येद्युर्मंत्रिसामंत—सम्मत्योत्सवपूर्वकं ॥ मंगलकलशं राज्ये । सुधीः स्थापयतिस्म सः ॥
॥ ७१ ॥ यशोभद्राभिधानानां । सूरीणां चरणांतिके ॥ सुरसुंदरभूपालः । परिव्रज्यामुपाददे ॥७२॥
राज्ये संस्थापितः कोऽपि । वणिग्जातिरितीर्ष्यया ॥ सीमास्थपार्थिवा राज्यं । हर्तुं तस्योपतस्थिरे
॥ ७३ ॥ सेनया चतुरंगिण्या । सहितेन महौजसा ॥ दृढपुण्यप्रभावेण । जिताः सर्वेऽपि तेन ते ॥
॥ ७४ ॥ शांतिमित्रस्य तस्याथ । राज्यं पालयतः सतः ॥ पत्न्यां त्रैलोक्यसुंदर्यां । सुतोऽभूज्जयशे-
खरः ॥ ७५ ॥ स च राजा निजे देशे । जिनचैत्यान्यनेकशः ॥ जिनार्चारथयात्रादि—धर्मकृत्या

---

निर्थी उत्सवपूर्वक मंगळकळशने राज्ये स्थाप्यो. ॥ ७१ ॥ (अने) सुरसुंदर राजाए यशोभद्र
नामना सूरिना चरणमां दीक्षा लीधी. ॥ ७२ ॥ कोइ वाणीयाने गादीए बेसाड्यो छे, एवी ईर्ष्या-
थी सीमाडाना राजाओ तेनुं राज्य लइ लेवाने (तेना पर) चडी आव्या. ॥ ७३ ॥ (परंतु)
दृढ पुण्यना प्रभावथी महा तेजस्वी एवा तेणे चतुरंगी सेनाथी ते सर्वेने जीती लीधा. ॥ ७४ ॥
शांति छे मित्र जेनो एवा तेने राज्य करतां त्रैलोक्यसुंदरी पत्नीथी जयशेखर (नामनो) पुत्र
थयो. ॥ ७५ ॥ ते राजाए पोताना देशमां अनेक जिनचैत्यो जिनबिंबो अने रथयात्रा विगेरे

न्यक्कारयत् ॥ ७६ ॥ अन्यदोद्यानमाशां । जयसिंहाभिधं गुरुं ॥ गत्वा ववंदे भावेन । सकलत्रः स नृपतिः ॥७७॥ पप्रच्छ च यथा केन । कर्मणा भगवन्मया ॥ प्राप्ता विमंबनोद्दाहे । देव्या प्राप्तं च दूषणं ॥ ७८ ॥ सूरिरूचेऽथ भरते । क्षेत्रेऽत्रैवास्ति पत्तनं ॥ क्षितिप्रतिष्टितं नाम । धनधान्यसमृद्धि-भाक् ॥ ७९ ॥ आसीत्तत्र सोमचंद्रा—भिधानः कुलपुत्रकः ॥ श्रीदेवीति च तद्भार्या । तौ मिथः प्रीतिशालिनौ ॥ ८० ॥ सोमचंद्रः प्रशांतोऽसा—वार्जवादिगुणान्वितः ॥ मान्यः समस्तलोकानां । तस्य भार्या च तादृशी ॥ ८१ ॥ इतस्तत्रैव नगरे । जिनदेवाभिधः सुधीः ॥ श्रावकोऽद्भुतसमं तेन

---

धर्मकृत्यो कर्यो. ॥ ७६ ॥ एक दिवस उद्यानमां आवेला जयसिंह नामना गुरुपासे राजाए प्रिया-सहित जइ भावथी वंदन कर्युं. ॥ ७७ ॥ अने पूछ्युं के हे प्रभु ! कया कर्मथी हुं लग्नमां दुःखी थयो, अने देवीपर कलंक आव्युं ? ॥ ७८ ॥ सूरि बोल्या आ भरतक्षेत्रमां धनधान्यथी समृद्धि-वाळुं थयेलुं क्षितिप्रतिष्टित नामनुं नगर छे. ॥ ७९ ॥ त्यां सोमचंद्र नामनो कुळपुत्र रहेतो हतो तेने श्रीदेवी ( नामनी ) भार्या ( हती, ) ते बंने परस्पर प्रीतिवाळा ( हतां, ) ॥ ८० ॥ ते सोमचंद्र शांत आर्जव विगेरे गुणयुक्त तथा समस्त लोकोने पूज्य हतो. अने तेनी स्त्री पण तेवी-

। तस्य मैत्री निरंतरं ॥७१॥ जिनदेवो धनाकांक्षी । धने सत्यपि सोऽन्यदा ॥ देशांतरं गंतुकामो । निजमित्रमभाषत ॥ ७३ ॥ धनायाहं गामिष्यामि । मयि तत्र गते त्वया ॥ मामकीनं धनं सप्त—क्षेत्र्यां वाप्यं यथाविधि ॥ ७४ ॥ तत्रापि तस्य पुण्यस्य । षष्ठांशो भवतादिति ॥ दिनाराणां सहस्राणि । दश तस्यार्पयत्करे ॥ ७५ ॥ गते देशांतरं तस्मिन् । सोमचंद्रोऽथ तत्सुहृद् ॥ व्ययतिस्म यथास्थानं । तद्द्रव्यं शुद्धचेतसा ॥ ७६ ॥ आत्मीयमपि शक्त्यानु—सारेणायं व्ययात्स्वयं ॥ तद्

ज हती. ॥ ७१ ॥ हवे तेज नगरमां जिनदेव नामनो बुद्धिवान् श्रावक हतो, तेनी साथे तेने मैत्री थइ ॥ ७२ ॥ जिनदेव धननो आकांक्षी होवाथी धन होवा छतां पण एक दिवस विदेश जवानी इच्छावाळो थयो थको पोताना मित्र प्रत्ये बोल्यो के हुं धनमाटे जाउं छुं, मारा त्यां गया पछी तारे मारा धनने सात क्षेत्रमां यथाविधि वाववुं. ॥ ७४ ॥ तने पण ते पुण्यनो छठो भाग मळो ? ( एम बोली ) दश हजार दिनार तेना हाथमां सोंप्या. ॥ ७५ ॥ हवे ते देशांतर गये छते तेनो मित्र सोमचंद्र शुद्ध चित्तथी ते द्रव्य यथास्थान वापरवा लाग्यो. ॥ ७६ ॥ पोते पण शक्तिअनुसार व्यय कर्यो, तेनी स्त्रीए पण ते जाणी अनुमोदनथी धर्म उपार्जन कर्युं. ॥

ज्ञात्वा तस्य भार्यापि । धर्मं जेजेऽनुमोदनात् ॥ ८७ ॥ तस्मिन्नेव पुरे तस्याः । सखी भद्राभिधा-
नतः ॥ नंदस्य श्रेष्ठिनः पुत्री । देवदत्तस्य गेहिनी ॥ ८८ ॥ देवदत्तः स कालेन । कर्मदोषेण
केनचित ॥ कुष्टी जज्ञे ततो भद्रा । तत्प्रिया विषसाद सा ॥ ८९ ॥ पुरः सख्यास्तयान्येद्यु—स्त-
त्स्वरूपं निवेदितं ॥ तया च हासपरया । भणिता सा ससंभ्रमं ॥ ९० ॥ हले त्वत्संगदोषेण । कु-
ष्टी जज्ञे पतिस्तव ॥ ममापि दृष्टिमार्गात्त्व—मतोऽपसर दूरतः ॥ ९१ ॥ सा तेन वचसा दूना । त्र-
पयाधोमुखी स्थिता ॥ हास्यमेतदिति प्रोच्य । तयैवाह्लादिता ततः ॥ ९२ ॥ स सोमचंद्रः श्रीदेव्या

---

॥ ८७ ॥ तेज शहेरमां नंदशेठनी पुत्री अने देवदत्तनी पत्नी भद्रा नामनी तेणीनी सखी हती. ॥
॥ ८८ ॥ एक समये कोइ कर्मना दोषथी ते देवदत्त कुष्टी थयो, तेथी तेनी पत्नी भद्रा विषाद पा-
मी. ॥८९॥ एक दिवस तेणीए ते स्वरूप पोतानी सखीने कह्युं, तेणी पण संभ्रमसहित मश्करीमां
बोली, ॥ ९० ॥ एली ए तारा संगना दोषथी तारो पति कुष्टी थयो तेथी मारी नजरथी दूर जा?
॥ ९१ ॥ ते वचनथी दुःखी थइ तेणी लज्जाथी अधोमुख थइ. त्यारे आ तो मश्करी छे एम क-
ही (श्रीदेवीए) तेने खुशी करी ॥ ९२ ॥ ते सोमचंद्र पोतानी प्रिया श्रीदेवीसाथे साधुनो सं-

। तया सार्धं स्वभार्यया ॥ साधुसंसर्गतः प्राप्तं । श्राद्धधर्मं च पालयन् ॥ ९३ ॥ अंते समाधिना मृत्वा । सौधर्मे त्रिदशाविमौ ॥ दंपती समजायेनां । पंचपल्योपमस्थिती ॥ ९४ ॥ सोमचंडात्मा । च्युत्वा तद् भवान् ॥ जीवश्च्युत्वा च श्रीदेव्या । जज्ञे त्रैलोक्यसुंदरी ॥ ९५ ॥ परद्रव्येण यत्पुण्यं । उपार्जितं तदा ॥ तदेषा नाटकेनैव । परिणीता नृपात्मजा ॥ ९६ ॥ हास्येनापि वयस्यायै । यद्दत्तं त्वनया पुरा ॥ कलंकः कर्मणा तेन । कलंकोऽस्या अपीह तु ॥ ९७ ॥ तदाकर्ण्य विरक्तौ तौ । दत्वा राज्यं स्वसूनवे ॥ राजा राज्ञी च प्रव्रज्यां । पार्श्वे जगृहतुर्गुरोः ॥

गतिथी प्राप्त थयेला श्रावकधर्मने पाळतां अंते समाधिथी मरण पामी ते दंपती सौधर्म ( देवलोकमां ) पांच पल्योपमना आयुष्यवाळा देव थया. ॥ ९३-९४ ॥ सोमचंद्रनो जीव सौधर्मथी चवी हे राजा तुं थयो. अने श्रीदेवीनो जीव चवीने त्रैलोक्यसुंदरी थइ. ॥९५॥ परद्रव्यथी तें जे पुण्य उपार्जन कर्युं तेथी आ कुमारीने तुं नाडांथी परण्यो. ॥९६॥ पूर्वभवे आणे पोतानी सखीने मश्करीमां जे कलंक दीधो ते कलंक तेने अहिं पण ( प्राप्त थयो ). ॥९७॥ ते सांभळी विरक्त थयेला राजा राणीए पोताना पुत्रने राज्य आपी गुरुपासे दीक्षा लीधी. ॥ ९८ ॥ हवे अनुक्रमे

॥ ९८ ॥ क्रमेण सोऽथ राजर्षिः । सर्वसिद्धांतपारगः ॥ स्थापितो गुरुणा सूरि—पदे परिकरावृतः ॥ ९९ ॥ त्रैलोक्यसुंदरी साध्वी । स्थापिता च प्रवर्तिनी ॥ विपद्य तौ ततः प्रांते । ब्रह्मलोकमुपेयतुः ॥ ५०० ॥ ततश्च्युतौ मनुष्यत्वं । प्राप्यानिमिषतां पुनः ॥ एवं भवे तृतीये तौ । प्राप्स्यतः पदमव्ययं ॥ १ ॥

देशनामिति श्रुत्वाथ । प्रजोर्वैराग्यतत्परः ॥ त्यक्तरागतु तत्कालं । जत्रात्कौसुंभवस्त्रवत् ॥ २ ॥ वीरसेनो गृहं गत्वा—पृच्छ्य मंत्रिपुरस्सरान् ॥ चित्रसेनकुमारस्य । राज्यभारं ददौ मुदा ॥ ३ ॥

---

ते राजऋषि सर्व सिद्धांतमां पार थतां गुरुए परिवार सहित आचार्यपदे स्थाप्या. ॥ ९९ ॥ त्रैलोक्यसुंदरी साध्वी प्रवर्तिनी थइ, पछी अंते बन्ने मरण पामी ब्रह्मलोकमां गयां ॥ ५०० ॥ त्यांथी चवी मनुष्यपणुं पामी मोक्षे जशे, एवीरीते त्रीजे भवे ते बन्ने मोक्ष पामशे. ॥ १ ॥

हवे एवीरीते प्रभुनी देशना सांभळी पाणीमांथी कसुंबी वस्त्रनी पेठे तत्काळ तजेल छे राग जेने एवो वैराग्यमां तैयार थया थका वीरसेने घेर जइ मंत्री विगेरेने पूछी हर्षथी चित्रसेन कुमारने राज्यनो भार दीधो. ॥ २-३ ॥ पछी राजा सघळा मंत्रीओप्रत्ये बोल्यो सांभळो ? आ पुत्रने

ततोऽवग् नृपतिः सर्वान् । मंत्रिणः शृणुताथ गोः ॥ स्थापितोऽयं सुतो राज्ये । माननीयो ममेव हि ॥४॥ स्वप्रियां कथयामास । त्यक्तमोहस्ततो नृपः ॥ जव्यरीत्या गृहं रद्दयं । दीक्षां गृह्णाम्यहं पुनः ॥ ५ ॥ महीपतेर्वचः श्रुत्वा । प्रियाप्येवं व्यजिज्ञपत ॥ विना त्वयाप्यहं स्वामिन् । धर्तुं प्राणान्न हि क्षमा ॥ ६ ॥ यतः–तावद्राज्यसुखं देव । तावत् शृंगारनूषणं ॥ स्त्रीणां भोगसुखं ताव— द्यावन्नाथो हि संनिधौ ॥ ७ ॥ वीरसेनस्ततोऽवादी—त्तावकीनः सुतो ह्यसौ ॥ लाल्यमानस्तु शक्रोव । तव सौख्यप्रदः खलु ॥ ८ ॥ सावकस्य सुता ह्येते । कष्य श्रीः कस्य संपदः ॥ स्त्रीणां भर्त्रा विना लोके ।

---

में राज्ये स्थाप्यो छे, तेथी मारी पेठेज तेने मानवो. ॥ ४ ॥ त्यारपछी तजी दीधेल छे मोह जेने एवा राजाए पोतानी प्रियाने कह्युं के तारे सुंदररीते घरनुं रक्षण करवुं, हुं दीक्षा लउंछुं. ॥ ५ ॥ नृपतिनुं वचन सांभळी ( तेनी ) पत्नीए पण विनंति करी के हे स्वामिन्! आपना विना हुं प्राण धारण करवाने शक्तिवान नथी. ॥ ६ ॥ कारणके–हे देव स्त्रीओने ज्यांसुधी पति पासे होय त्यां सुधी स्त्रीओने राज्यसुख शृंगारानूषण अने जोगसुख ( होय छे ). ॥ ७ ॥ त्यारे वीरसेन बोल्यो आ तारो पुत्र पालन करवाथी तने इंद्रनी पेठे सुख आपनारो ( थशे, ) ॥ ८ ॥ ते बोली ते पु·

सर्वं तद्धि विषायते ॥ ९ ॥ वैराग्यरंजितो राजा । प्रियया च समन्वितः ॥ दीक्षार्थं वीरनाथस्य । समवसरणं ययौ ॥ १० ॥ नत्वा चरमतीर्थेशं । स्तुत्वा चैव जगद्गुरुं ॥ राजा प्रियायुतो दीक्षां । जग्राह विनयान्वितः ॥ ११ ॥ दीक्षया पालयन् सोऽथ । खड्गधारोपमं व्रतं ॥ विजहार महीपीठे । भव्यजीवान् विबोधयन् ॥ १२ ॥ चित्रसेननराधीशः । पालयन् सकलां प्रजां ॥ रत्नसारं निजं मित्रं । स्थापयामास मंत्रिणं ॥ १३ ॥ मंत्रिपंचशतेष्वेष । मुख्यमंत्रीश्वरोऽभवत् ॥ पालयन् सकलं राज्यं

---

वो कोना छे ? लक्ष्मी, वैभव, ( विगेरे ) कोना छे ? स्त्रीजने जगतमां पतिविना ते सघळु विष जेवुं छे. ॥ ९ ॥ हवे वैराग्यथी रंगायेलो राजा प्रियासहित दीक्षामाटे वीरप्रभुनां समवसरणमां गयो. ॥ १० ॥ ( त्यां ) छेल्ला तीर्थंकरने नमी तथा जगद्गुरुनी स्तुति करी विनयवान् राजाए राणी सहित दिक्षा लीधी. ॥ ११ ॥ हवे ते दीक्षाथी खड्गधारा जेवुं व्रत पाळतो थको भव्य जीवोने बोध आपतो पृथ्वीपर विहार करवा लाग्यो. ॥ १२ ॥ ( अहिं ) सघळी प्रजाने पाळतां चित्रसेन राजाए पोताना मित्र रत्नसारने मंत्रिपदे स्थापन कर्यो. ॥ १३ ॥ ते पण पांचसो मंत्रिमां सघळी प्रजाने पाळनारो तथा जेना प्रतापथी तपेली छे पृथ्वी एवो ते मुख्य मंत्री थयो. ॥

। प्रतापाक्रांतभूतलः ॥ १४ ॥ रत्नसारोऽन्यदा चिंतां । करोतीति दिनात्यये ॥ विघ्नत्रयमगान्नष्टं ।
नृपतेः पुण्ययोगतः ॥ १५ ॥ जनानां जगति नन । पुण्यमेव वरं स्मृतं ॥ विमृश्यैवं हृदि रत्नसा-
रस्त्वेवं जगौ नृपं ॥ १६ ॥ राज्यसौख्यप्रदं लोके । दुष्टारिष्टप्रणाशनं ॥ मनोऽभीष्टार्थदं राजन् पु-
ण्यमेव प्रकीर्तितं ॥ १७ ॥ अधुनापि नन पुण्यं । कुरु तीर्थेशभाषितं ॥ दुरितानि विलीयंते ये-
न राजंस्तवाधुना ॥ १८ ॥ उपदेशो हि विज्ञानां । हृदये वसति ध्रुवं ॥ कुरु जिनालयोद्धार—
दीनोद्धरणकादि तत् ॥ १९ ॥ श्रुत्वेत्यसौ चकाराग्र्य । जीवादिप्रतिपालनं ॥ जिनार्चातत्परो ज्ञातः

---

॥ १४ ॥ एक दिवस संध्याकाळे रत्नसार विचारवा लाग्यो के पुण्यना योगथी राजाना त्रण वि-
घ्नो नाश पाम्या. ॥ १५ ॥ तथी जगतमां मनुष्योने पुण्यज उत्तम कह्युं छे, एम हृदयमां विचारी
रत्नसार राजाप्रत्ये बोल्यो के. ॥ १६ ॥ हे राजन्! आ लोकमां राज्यसुख आपनारुं दुष्ट रोगोनो
नाश करनारुं अने मन वांछित वस्तु आपनारुं पुण्यज कह्युं छे. ॥ १७ ॥ तेथी हमणां पण हे
राजन् तीर्थंकरे कहेला धर्म कर ? जेथी तारां सघळां दुष्कर्मो नाश पामे. ॥ १८ ॥ डाह्या पुरुषनां
हृदयमां खरेखर उपदेश लागे छे, तथी तुं जीर्णोद्धार तथा दरिद्रीनो उद्धार विगेरे कर ? ॥१९॥

। पद्मावत्या युतो मुदा ॥ २० ॥ एवं नृपः प्रियायुक्तः । पुण्यपूरितमानसः ॥ रत्नसारस्तृतीयोऽपि । वर्तते पुण्यवत्सलः ॥ २१ ॥ तिष्टंत्येकत्र देशस्था । भुंजानाश्चैकभाजने ॥ शयनेऽपि समासन्ना-स्तिष्टंति च त्रयोऽपि ते ॥ २२ ॥ स्वामिभक्तिपरो नित्यं । रत्नसारो महामतिः ॥ मुदा प्राहरिको भूत्वा । तस्य तिष्टति सर्वदा ॥ २३ ॥ एवं च तिष्टतां तेषां । सदानुभवतां सुखं ॥ कुर्वतां धर्मकर्मा-णि । गतः कालः कियानथ ॥ २४ ॥ अथान्येद्युर्निशामध्ये । तौ सुप्तौ सुखनिद्रया ॥ दृष्टोऽही र-त्नसारेण । तदा पर्यंकसन्निधो ॥ २५ ॥ यक्षोक्तवचनं स्मृत्वा । खड्गमादाय धावता ॥ पातितस्तेन

---

आ सांभळी ते हर्षथी पद्मावतीसहित जीवोनु प्रतिपालन तथा जिनपूजनमां तत्पर थयो. ॥ २० ॥ एवीरीते पुण्ययुक्त चित्तवाळो राजा प्रियासहित तथा त्रीजो रत्नसार पण पुण्यवत्सल थयो. ॥२१॥ ते त्रणे एकज स्थले रहेता, एकज भाजनमां जमता, तेमज शयन ( वखते ) पण त्रणे नजदीक रहेता हता. ॥ २२ ॥ महा बुद्धिवान् रत्नसार स्वामिभक्तिथी हर्षथी तेनो प्राहरिक थइ रहेतो हतो. ॥ २३ ॥ एवीरीते तेओना रहेतां, हमेशां सुख अनुभवतां तथा धर्मकार्यो करतां केटलोक काळ व्यतीत थयो. ॥ २४ ॥ हवे एक दिवस रात्रिए ( पतिपत्नी ) बंने सुखे सूता छे, तेवामां

घातेन । स भूमौ दारुणोरगः ॥ २६ ॥ तच्छोणितेऽपतद्वासो । राज्ञीजंघाप्रदेशं ॥ वस्त्रांचलं तदा मंत्री । भीतस्तस्मादपाकरोत् ॥ २७ ॥ जागृतः सहसा राजा । तदैव दैवयोगतः ॥ किमेतदिति पृष्टोऽथ । तेन मंत्रीश्वरस्तदा ॥ २८ ॥ रत्नसारस्तदा मंत्री । कंपमानो व्यचिंतयत् ॥ इतस्तटी इतो व्याघ्रः । पतितः संकटे भृशं ॥ २९ ॥ वदामि चेदहं सत्यं । भवाम्यश्ममयस्तदा ॥ अलीकवचनै राजा । चिंतयिष्यति चान्यथा ॥ ३० ॥ उपकारा न गृह्यंते । न च सेवा न पौरुषं ॥ नृपस्ते दु-

---

रत्नसारे पलंगपासे ( एक ) सर्प जोयो. ॥२५॥ तेणे यक्षे कहेलुं वचन याद करी तरवार लइने दोडी एक घाथी भयंकर सर्पने जमीनपर पाड्यो. ॥ २६ ॥ तेवामां राणीनी जंघा आगळनो वस्त्रनो छेडो तेना लोहीमां पड्यो. त्यारे भयभीत थयेलो मंत्री (ते) तेमाथी खसेडवा लाग्यो. ॥२७॥ त्यारे दैवयोगथी सहसा जागेला राजाए मंत्रीश्वरने पूछ्युं आ शुं छे ? ॥२८॥ त्यारे कंपतो रत्नसार चिंतववा लाग्यो के आ तो व्याघ्रतटी न्याय थयो, हुं बहु संकटमां पड्यो. ॥ २९ ॥ जो हुं सत्य कहीश तो पत्थर थइश अने असत्य वचनथी राजा बीजुंज चिंतवशे. ॥ ३० ॥ जे राजाओ उपकार सेवा अने बळनी कदर करता नथी, ते दुर्जन जेवा पोताना कदी थता नथी. ॥ ३१ ॥ एम

जैनप्राया । नात्मीया हि कथंचन ॥ ३१ ॥ एवं विचिंत्य हृदये । जगाद सचिवोत्तमः ॥ स्वामिने तु हितं वाक्यं । बुधाः सत्यं वदंति च ॥ ३२ ॥ यतः—सत्यं मित्रे प्रियं स्त्रीषि-रलीकमधुरं द्विषां ॥ अनुकूलं च सत्यं च । वक्तव्यं स्वामिना सह ॥ ३३ ॥ एतां वार्तामय स्वामिन् । कथयामि य दा तव ॥ तदा पाषाणरूपोऽहं । भविष्यामीति निश्चितं ॥ ३४ ॥ तदा जगाद भूपालो । वार्ता त्वं कथय द्रुतं ॥ न हि वचनमात्रेण । पाषाणत्वं प्रजायते ॥ ३५ ॥ एतद्वचनमाकर्ण्य । रत्नसारः क-लानिधिः ॥ साहसं च समालंब्य । प्रोक्तवान् यक्षभाषितं ॥ ३६ ॥ परिणीय त्विमां कन्यां । यूय·

---

विचारी ते उत्तम प्रधान मनमां बोल्यो के डाह्या पुरुषो स्वामीने हितकारी तथा सत्य वाक्य कहे छे. ॥ ३२ ॥ कह्युं छे के—मित्रनी साथे सत्य. स्त्रीनी साथे प्रिय, शत्रुनी साथे असत्यप्रिय अने स्वामिनी साथे सत्यप्रिय बोलवुं. ॥ ३३ ॥ हे स्वामिन् जो आ वात हुं तमोने कहोश तो खरेखर हुं पाषाणरूप थाइश. ॥३४॥ त्यारे राजा बोल्यो मने तरत वात कहे? वचनमात्रथी कंइ पाषाणपणुं थतुं नथी. ॥३५॥ आ वचन सांभळी कळानो निधान रत्नसार साहस धरी यक्षे कहेलुं कहेवा लाग्यो के, ॥ ३६ ॥ आ कन्याने परणीने तमो ज्यारे वडवृक्ष नीचे रही आहिं आव्या हता ते वखते गोरे

मत्र समागताः ॥ स्थित्वा वटतरोर्देशे । जानीथ स्वामिनः स्वयं ॥ ३७ ॥ पूर्वं तुरंगमाद्दुःखं । भवतोऽपाकृतं मया ॥ न लक्षितोऽहं केनापि । यन्त्रंस्तत्र पराश्वकं ॥ ३८ ॥ इत्युक्तं वचनं याव—द्भूपाग्रे तेन मंत्रिणा ॥ बभूवाश्ममयस्ताव—दाजानु सोऽपि तत्क्षणं ॥ ३९ ॥ चित्रसेनस्ततो राजा । तं जगाद वदाग्रतः ॥ मंत्रीशोऽपि समाचष्ट । तस्य विघ्नं द्वितीयकं ॥ ४० ॥ प्रतोल्या निकटस्थस्य । तवास्येऽश्वो हतो मयो ॥ तेन पश्चान्निवृत्तोऽश्वः । प्रतोली च तदापतत ॥ ४१ ॥ इत्युक्त्वा स तदा जातः । कटींयावद् दृषन्मयः ॥ नृपेन पुनराभाणि । जातं किं च ततो वद ॥ ४२ ॥ राज्ञ्या

---

जाणोजो, ॥ ३७ ॥ पहेलां आपनुं घोडाथी दुःख में दूर कर्युं, तने बीजो अश्व आपतां मने कोइए जोयो नहि. ॥ ३८ ॥ एटलुं वचन जेटलामां ते मंत्री राजापासे बोल्यो तेटलामां तुरतज जानुसुधी पाषाण थयो. ॥ ३९ ॥ पछी चित्रसेन राजाए तेने कह्युं आगळ कहे ? मंत्रीए पण तेनुं बीजुं विघ्न कह्युं के, ॥४०॥ तुं दरवाजा नजदीक आवतां तारा घोडानां मुखपर में मार्यो, तेथी ते पाछो फर्यो, अने दरवाजो पड्यो. ॥४१॥ एटलुं तेणे कह्युं त्यारे ते केडसुधी पाषाण थयो, राजाए पुनः कह्युं त्यारपछी शुं थयुं ते कहे ? ॥ ४२ ॥ हे स्वामिन्! विमलाराणीए पीरसेला विषवाळा

विमलया स्वामिन् । मोदकाः परिवेषिताः ॥ विषयुक्ता मया युक्त्या । परं तेऽपि ह्यपाकृताः ॥ ४३ ॥
इति यावद्वचस्तेन । गदितं हितकांक्षिणा ॥ तावदश्ममयो जातः । कंठं यावत्स मंत्रिराट् ॥ ४४ ॥
नृपेनाथ ततः पृष्टो । मंत्रिराजोऽवदद्वचः ॥ शृणु स्वामिन् यथा जातं । वृत्तांतमधुनापि हि ॥४५॥
पर्यंकेऽत्र युवां स्वामिन् । सुप्तावास्तं सुनिद्रया ॥ शृंखलोत्तीर्थमाणस्तु । मया दृष्टो भुजंगमः ॥४६॥
हतो मया भुजंगोऽयं । पतिता रक्तबिंदवः ॥ राज्ञीजंघोपरि नीत्वा । मया वस्त्रेण मार्जिताः ॥ ४७ ॥
कथितोऽयं हि वृत्तांतो । मया स्वामिंस्त्वदग्रतः ॥ यक्षोक्ता विपदो ह्येते । ते गताः खलु पुण्यतः ॥

मोदक पण में दूर कर्या हता. ॥ ४३ ॥ हित इच्छनारा तेणे आ वचन कह्यु तेटलामां ते मंत्री कंठसुधी पाषाणरूप थयो. ॥ ४४ ॥ त्यारपछी राजाए पूछतां मंत्रिराज बोल्यो हे स्वामिन् ! हजु पण बनेलो बनाव सांभळ ! ॥ ४५ ॥ हे स्वामिन् ? आप बन्ने सुनिद्रामां सूतेला हता तेवामां में सांकळपरथी उतरता सर्पने जोयो, ॥ ४६ ॥ ते सर्पने में मार्यो, ( तेना ) लोहीनां टीपां राणीनी जंघापर पड्यां तयथी में ते वस्त्रथी लूछी नाख्यां, ॥ ४७ ॥ हे स्वामिन् ! में तारी पासे आ वृत्तांत कह्यो छे, यक्षे कहेली आ तारी चार आपदा पुण्यथी नाश पामी छे. ॥ ४८ ॥ एम कहेतां मंत्री

॥ ४८ ॥ इत्युक्ते सहसा मंत्री । जातः पाषाणसन्निभः ॥ पतितश्च महीपीठे । देववाचा हि नान्य-
था ॥४९॥ मित्रस्यापदमालोक्य । राजा दुःखाकुलो भृशं ॥ स्मारं स्मारं गुणांस्तस्य । मूर्छया प-
तितो भुवि ॥ ५१ ॥ राजा शीतोपचारेण । चैतन्यं प्रापितस्तदा ॥ क्व गतो मित्र मुक्त्वा मा—मि-
त्यादि विललाप च ॥ ५२ ॥ विपदां मे ह्यपाकर्ता । यः कृतज्ञशिरोमणिः ॥ दुष्प्रापं मित्ररत्नं हा ।
मया मूढेन हारितं ॥ ५३ ॥ भवितव्यानुसारेण । पुंसां बुद्धिः प्रजायते ॥ संकटे पातितो मित्र-
वरोऽयं दुर्धिया मया ॥ ५४ ॥ मित्रं विना वृथा राज्यं । वृथा देशो वृथा सुखं ॥ वृथा कोशश्च सै-

---

अकस्मात् पाषाणजेवो थइ गयो, अने पृथ्वीतलपर पड्यो, खरेखर देववाणी अन्यथा ( थती )
नथी. ॥ ४९ ॥ मित्रनी विपत्ती जोइ अतिदुःखाकुल राजा तेना गुण स्मरी स्मरी मूर्छाथी भूमी-
पर पड्यो. ॥ ५१ ॥ शीतोपचारथी चैतन्य पामेलो राजा हे मित्र ! तुं मने मूकी क्यां गयो ?
इत्यादि प्रकारे रडवा लाग्यो. ॥ ५२ ॥ अरेरे ! मारा दुःखनो नाश करनार कृतज्ञोमां शिरोमणी
अने दुःखे प्राप्त करी शकाय एवा मित्रने में मूढे खोयो. ॥ ५३ ॥ भाविअनुसारे मनुष्योने बुद्धि
थाय छे, दुर्बुद्धि एवा में उत्तम मित्रने दुःखमां नाख्यो. ॥ ५४ ॥ मित्रविना राज्य, देश, सुख,

न्यं च । जीवितं चापि मे वृथा ॥ ५५ ॥ तद्वियोगातुरो नूनं । प्राणत्यागं करोम्यहं ॥ इष्टबंधुवि-
युक्ताना—मेतदेव हितावहं ॥ ५६ ॥ विमृश्यति निजे चित्त चित्रसेनो नरेश्वरः ॥ यावत्समुद्य-
तो जातो । मृत्यवे कृतनिश्चयः ॥ ५७ ॥ तावत्पद्मावती राज्ञी । ज्ञात्वा तस्याशयं हृदि ॥ व्याचिंत-
यदहो जात—मसमंजसकं भृशं ॥ ५८ ॥ भविष्यत्यपवादो हि । राज्ञश्चात्मविघाततः ॥ ततः के-
नाप्युपायेन । कर्तव्यं काललंघनं ॥ ५९ ॥ ध्यात्वेति सावदत्स्वामिन् । कातरत्वं परित्यज ॥ साह-
सं च समालंब्य । कार्यं कुरु यथोचितं ॥ ६० ॥ आत्मघातविचारः का—पुरुषेष्वेव दृश्यते ॥ भ-

---

भंडार, सैन्य, अने मारुं जीवितव्य पण वृथा छे. ॥ ५५ ॥ तेना वियोगथी आतुर थयेलो हुं ख-
रेखर प्राणत्याग करीश, प्रियबंधुना वियोगीजनने एज हितकारी छे. ॥ ५६ ॥ एम चित्तमां विचारी
करेल छे मरवानो निश्चय जेणे एवो चित्रसेनराजा जेटलामां तैयार थाय छे, तेटलामां पद्मावतीरा-
णीए हृदयमां तेनो आशय जाणीने विचार्युं के अहो बहु खोटुं थयुं. ॥ ५७-५८ ॥ राजाना
आत्मघातथी अपवाद थशे, तेथी कोइपण उपायथी समय पसार थवा देवो. ॥५९॥ एम विचा-
री ते बोली हे स्वामिन्! बीकणपणुं तजी दीओ ? अने साहस धरी यथोचित कार्य करो ? ॥६०॥

वादृशानां नृपाना—मयोग्यं तत्तु सर्वथा ॥ ६१ ॥ मित्रस्य जीवनोपाये । तूद्यमं कुरु साहसात् ॥ त्वयाथ दानशालायां । दातव्यं दानमुत्तमं ॥ ६२ ॥ तेन लुब्धाः समेष्यंति । दूरदेशांतरे स्थिताः ॥ रक्तांबरजटाधारि—सन्यासियोगिनस्त्विह ॥ ६३ ॥ कापटिकास्तथानेके । मंत्रतंत्रविशारदाः ॥ मारणोच्चाटनप्रज्ञा । आगमिष्यंत्यनेकशः ॥ ६४ ॥ तन्मध्यात्कोऽपि ते मित्रं । नूनं जीवापयिष्यति ॥ मनोरथस्तथा स्वामि—न्नस्माकं सिद्धिमेष्यति ॥ ६५ ॥ उपायः स तया प्रोक्तः । कृतो नृपेन तत्क्षणात् ॥ वैदेशिकाः समायाता । बहवस्तत्र योगिनः ॥ ६६ ॥ पृच्छति स प्रतीकारं । तेषां मि-

---

आत्मघातनो विचार थायलाउनेज होय छे, आप जेवा राजाउने तो ते सर्वथा अयोग्य छे. ॥ ॥ ६१ ॥ साहसथी मित्रना जीवनना उपायमां उद्यम करो ? हवे आपे दानशाळामां उत्तम दान देवुं. ॥ ६२ ॥ तेथी लोभायेला दूर देशमां रहेला रक्तांबरीउ, जटाधारीउ, संन्यासीउ, अने यो-गीउ अहीं आवशे, ॥ ६३ ॥ वळी मंत्रतंत्रना जाणकार, तथा मारवा उगाडवाने शक्तिवान् एवा अनेक कापडीउ आवशे. ॥ ६४ ॥ तेउमांथी खरेखर कोइक पण आपना मित्रने जीवाडशे अ-ने हे स्वामिन्! तेथी आपणा सर्व मनोरथो सिद्ध थशे. ॥ ६५ ॥ राजाए पण तेणीए कहेलो

त्रापदो हरं ॥ कथितं च यथा येन । कृतं नृपेन तत्तया ॥ ६७ ॥ कष्टं न याति मित्रस्य । प्रतीकारे कृतेऽपि हि ॥ निराशौ दंपती जातौ । ततश्चिंतापरायणौ ॥ ६८ ॥ दुःखितश्चिंतयामास । मित्रशोकाकुलो नृपः ॥ राज्यचिंतासभागीत—नृत्यादिषु पराङ्मुखः ॥ ६९ ॥ कियत्यपि गते काले । ततो राज्ञा विचिंतितं ॥ विघ्ना हि कथिता येन । यक्षेणाथ महात्मना ॥ ७० ॥ स एवास्य प्रतीकारं । कथयिष्यति निश्चितं ॥ इति चिंतयता तेन । सा निशोल्लंघिता तदा ॥ ७१ ॥ जाते सूर्योदये राजा । जीर्णमंत्रीश्वरस्य च ॥ राज्यभारं समारोप्य । प्रयाणायोद्यतोऽभवत ॥ ७२ ॥ आपृ-

---

उपाय तुरतज कर्यो, अने तेथी त्यां घणा विदेशी योगीओ आव्या. ॥ ६६ ॥ ते तेओने मित्रनी विपत्ति हरनारा उपाय पूछतो अने जेम जे कहेतो तेम राजा करतो ॥ ६७ ॥ (परंतु) उपाय कर्ये छते पण मित्रनुं दुःख गयुं नहि, तेथी ते दंपति चिंतातुर थया थका निराश थया. ॥ ६८ ॥ (तेथी) मित्रना शोकथी आकुळ थयेलो, राज्यचिंता, सभा, गीत, नृत्य, विगेरेथी विमुख राजा चिंता करवा लाग्यो. ॥ ६९ ॥ थोडो समय जतां राजाए विचार्युं के जे महात्मा यक्षे विघ्नो कह्या हता तेज खरेखर आनो उपाय कहेशे एम चिंतवता तेणे ते रात पसार करी. ॥ ७१ ॥ सूर्योदय

चक्ष्य स्वप्रियां नृप— श्वलितः शुभवासरे ॥ खड्गमादाय निर्भीको । वटं तंप्रति चोत्सुकः ॥ १३ ॥
कियद्भिर्दिवसैस्तत्र । प्राप्तो राजा वटद्रुमं ॥ श्रांतश्चिंतातुरो दुःखी । सुप्तो वटतरोस्तले ॥ १४ ॥ वि-
योगार्तस्य तस्याथ । निद्रा नागान्मनागपि ॥ नीरनिर्गतमीनेव ।-यक्षिणी तं ददर्श सा ॥ १५ ॥
यक्षिण्यूचे तदा यक्षं । कृपापूरितमानसा ॥ स्वामिन्नेष पुमान् को हि । केन दुःखेन दुःखितः ॥
॥ १६ ॥ यक्षोऽवक् च स एवायं । प्रिये योऽत्र पुरागतः ॥ सकलत्रः ससैन्यश्च । समित्रोऽस्य त-

थतां राजाए जुना प्रधानने राज्यनो भार सोंपी प्रयाणनी तैयारी करी. ॥ १२ ॥ ( त्यारपछी )
पोतानी प्रियाने पूछीने उत्सुक चित्तवाळो तथा निर्भय एवो राजा शुभ दिवसे ते वड तरफ चा-
ल्यो. ॥ १३ ॥ केटलेक दिवसे राजा त्यां वडपासे आव्यो ( अने ) थाकेलो चिंतातुर अने दुः-
खी ( एवो ते ) वडवृक्ष नीचे सूतो ॥ १४ ॥ पाणीमांथी नीकळेला माछलांनी पेठे वियोगथी
दुःखी थयेला एवा तेने जरा पण निद्रा आवी नहि, ( एटलामां ) ते यक्षिणिए तेने जोयो. ॥
॥ १५ ॥ त्यारे कृपाथी पूर्ण छे चित्त जेनुं एवी यक्षिणी यक्षप्रत्ये बोली हे स्वामिन् आ पुरुष को-
ण छे ? तथा कया दुःखथी दुःखी थाय छे ? ॥ १६ ॥ यक्ष बोल्यो हे प्रिया ! आ तेज पुरुष छे के

रोस्तले ॥ ૭૭ ॥ एतद्वचनमाकर्ण्य । परदुःखेन दुःखिना ॥ यक्षिणी पृछते यक्षं । दुःस्थितोऽसौ
कथं विभो ॥ ૭૮ ॥ यक्षोऽवादीत्कुमारोऽसौ । गुणानामेकमंदिरं ॥ इष्टमित्रवियोगार्तो । भ्रमत्येव·
मितस्ततः ॥ ૭૯ ॥ जगाद यक्षिणी स्वामिन् । वियुक्तः सुहृदा स किं ॥ बभाषे यक्षराजोऽपि ।
प्रिये तत्कारणं शृणु ॥ ૮૦ ॥ त्वदग्रे यन्मया पूर्वं । प्रोक्तं विघ्नचतुष्टयं ॥ अस्य विश्वेऽपि ते विघ्ना ।
गता मित्रस्य बुद्धितः ॥ ૮૧ ॥ परं तेन कथा सास्य । कुमारस्य दुराग्रहात् ॥ कथिता मित्रवर्ये·
ण । तत्स जातो दृषन्मयः ॥ ૮૨ ॥ तद्वियोगातुरो नृपो । भ्रमतऽसौ भृशं भुवि ॥ स्नेहो दुःखत·

---

जे पहेलां पति सैन्य अने मित्र सहित वृक्षनीचे ( रह्यो हतो ). ॥ ૭૭ ॥ आ वचन सांभळी
पर दुःखे दुःखी थयेली यक्षिणीए यक्षने पूछ्युं हे प्रभु ते शा माटे दुःखी छे ? ॥ ૭૮ ॥ यक्ष बो·
ल्यो गुणोना मंदिररूप आ कुमार प्रिय मित्रना वियोगथी दुःखी ( थइ ) ज्यां त्यां आ प्रमाणे
भमे छे. ॥ ૭૯ ॥ यक्षिणी बोली हे स्वामिन् ! ते मित्रथी केम विखुटो ( पड्यो छे ) यक्षराज
पण बोल्यो हे प्रिया ! तेनुं कारण सांभळ ? ॥ ૮૦ ॥ में पूर्वे आना चार विघ्नो जे तारा पासे
कह्या हता ते सघळा विघ्नो मित्रनी बुद्धिथी गया ॥ ૮૧ ॥ पण ते उत्तम मित्रे कुमारना दुराग्रह·

रोगमूलं । स्नेहोऽनर्थकरः स्मृतः ॥ ७४ ॥ कृपालुहृदया ब्रूते । यक्षस्याग्रेऽथ यक्षिणी ॥ स्वामिन्नस्य प्रतीकारो । विद्यते वा न वा वद ॥ ७५ ॥ विमृश्य हृदये यक्षो । यक्षिणीं इति भाषते ॥ अस्य रोगप्रतीकारं । कथयामि शृणु प्रिये ॥ ७६ ॥ कापि स्त्री शीलसंपन्ना । स्वांगजेन समन्विता ॥ पाणिना चेत्स्पृशेदेनं । नीरोगोऽसौ तदा भवेत् ॥ ७७ ॥ चित्रसेनो नृपो वार्ता । श्रुत्वा तां मुदितस्तदा ॥ गतचिंतश्च तत्रैव । सुप्तो निर्भरनिद्रया ॥ ७८ ॥ यक्षोक्तवचनात्प्रीतः । स्वकीयहृदये त-

---

र्थी ते कथा तेने कही तेथी ते पाषाणरूप थयो. ॥ ७२ ॥ तेना वियोगथी आतुर थयेलो राजा पृथ्वीपर रखडे छे. खरेखर स्नेह दुःखवृक्षनुं मूळ छे. ( तथा ) स्नेह अनर्थ करनारो होय छे. ॥ ॥ ७४ ॥ कृपालु हृदयवाळी यक्षिणी यक्षप्रत्ये बोली हे स्वामिन् तेनो उपाय छे के नहि ते ( मने कहे ? ॥ ७५ ॥ यक्षे पण हृदयमां विचारी यक्षिणीने कह्यु हे प्रिया ! आ रोगनो उपाय कहुं छुं ते सांभळ ? ॥ ७६ ॥ कोइ शियळवाळी स्त्री पोताना पुत्रसहित जो तेने हाथथी स्पर्श करे तो ते नीरोगी थाय. ॥ ७७ ॥ चित्रसेन राजा आ वार्ता सांभळी हर्षित थयो थको चिंतायी विमुख थइ त्यांज भरनिद्रामां पड्यो. ॥ ७८ ॥ त्यारपछी यक्षे कहेला वचनथी पोतानां हृदयमां संतुष्ट

तः ॥ कुमारः प्रातरुत्थाय । चलितः स्वपुरंप्रति ॥ ७९ ॥ अविलंबप्रयाणेन । प्रमोदं हृदि संवहन् ॥
कियद्भिः स दिनैः प्राप्तो । वसंतपुरपत्तनं ॥ ८० ॥ तमागतं तदा दृष्ट्वा । प्रजा सर्वापि हर्षिता ॥
पद्मावती प्रियं दृष्ट्वा । जाता प्रेमपरायणा ॥ ८१ ॥ आसन्नप्रसवां राज्ञीं । तस्मिन्नवसरे नृपः ॥ स-
मालोक्याथ संजातो । हर्षपूरितमानसः ॥ ८२ ॥ वांछितार्थस्य सिद्धिर्मे । जाता पुण्यप्रभावतः ॥
इति ध्यात्वा स्थितो नृपो । हर्षार्द्रितमनास्तदा ॥ ८३ ॥ चित्रसेननृपश्चैवं । सदाचारपरायणः ॥ ध-
र्मध्यानपरो नित्यं । गमयामास वासरान् ॥ ८४ ॥ शुभे दिने शुभे लग्ने । सुमुहूर्ते नृपप्रिया ॥ सु-

---

थयेलो कुमार प्रभाते उठीने पोताना शहेर तरफ चाल्यो. ॥ ७९ ॥ अविलंब प्रयाणथी हृदयमां
हर्ष धरतो ते केटलेक दिवसे वसंतपुर शहेरमां आव्यो. ॥ ८० ॥ त्यारे तेने आवेलो जोइ स-
घळी प्रजा हर्ष पामी, पद्मावती (पण) पतिने जोइ प्रेम परायण थइ. ॥ ८१ ॥ ते अवसरे रा-
जाए राणीने नजदीक छे प्रसवकाळ जेनो एवी जोइ हर्षथी पूर्ण चित्तवाळो थयो. ॥ ८२ ॥ पु-
ण्यना प्रभावथी मारी इच्छीत वस्तुनी सिद्धि थइ एम विचारी हर्षित चित्तवाळो राजा रहेवा लाग्यो.
॥ ८३ ॥ एवीरीते सदाचार परायण तथा धर्मध्यानमां लीन एवा चित्रसेन राजाए केटलाक दिव-

पुत्रं जनयामास । प्राचीवार्क नभोमणिं ॥ ९५ ॥ महांतमुत्सवं राजा । चकार सुतजन्मनः ॥ जि-
नचैत्ये महापूजां । चंदनागुरुसंयुतां ॥ ९६ ॥ स दीनोद्धरणं कुर्वन् । याचकादीनि पोषयन् ॥ स्व-
जनांस्तोषयामास । वांछितार्थप्रदानतः ॥ ९७ ॥ षष्टिजागरणं कृत्वा । राजा धर्मपरो मुदा ॥ याच-
केभ्यो ददौ दानं । मनोवांछातिगं तदा ॥ ९८ ॥ द्वादशे दिवसे राजा । सर्वज्ञातीनभोजयत ॥
ततः पुत्रस्य संतुष्टो । नामस्थापनमातनोत् ॥ ९९ ॥ राज्ञोचे मत्कुले पुत्रो । जातः पुण्यप्रभावतः

---

सो पमाड कर्यो. ॥ ९४ ॥ ( हवे ) राणीए शुभ दिवसे शुभ चोघडीए सारा मुहूर्तमां पूर्व दिशा
जेम सूर्यने तेम पुत्रने जन्म आप्यो. ॥ ९५ ॥ राजाए पुत्र जन्मथी जिनालयमां चंदन अगुरु
( विगेरेथी ) सहित मोटी पूजा तथा मोटो उत्सव कर्यो. ॥ ९६ ( वळी ) दीनोनो उद्धार क-
र्यो, याचकोने पोष्या अने स्वजनोने इच्छित वस्तुओ आपी संतोष पमाड्या. ॥ ९७ ॥ धर्ममां त-
त्पर राजाए छठ्ठी जागरण करी याचकोने मनवांछित दान हर्षथी आप्युं. ॥ ९८ ॥ बारमे दिवसे
राजाए सघळी ज्ञातीओने भोजन कराव्युं, पछी संतुष्ट थयेला तेणे पुत्रनी नाम स्थापना करी ॥
॥ ९९ ॥ राजा बोल्यो मारा कुळमां पुण्यना प्रभावथी पुत्र जन्म्यो छे, तेथी धर्मानुसारे तेणे ध-

॥ तेन धर्मानुसारेण । धर्मसेनोऽभ्यधीयतां ॥ ६०० ॥ ततः स्वजनसंयुक्तः । पद्मावत्या समन्वितः ॥ वाद्येषु वाद्यमानेषु । दानशालां गतो नृपः ॥ १ ॥ रत्नसारं शिलारूपं । यक्षवाचं हृदि स्मरन् ॥ यथोक्तविधिनासौ तं । स्नपयामास हर्षतः ॥ २ ॥ ततः पद्मावती राज्ञी । कृत्वोत्संगे निजं सुतं ॥ स्मृत्वा हृदि नमस्कार—मिदं वचनमब्रवीत् ॥ ३ ॥ श्रूयतां लोकपाला भोः । ग्रहाः सूर्यादयोऽपि च ॥ क्षेत्रपालास्तथा सर्वे । सर्वे वैमानिकादयः ॥ ४ ॥ मनसा कर्मणा वाचा । शीलं चेन्मम निर्मलं ॥ तदा स्पर्शेन मत्पाणेः । सज्जीभवतु मंत्रिराट् ॥ ५ ॥ इत्युक्त्वाथ तया स्पृष्टः । करेणोत्प

---

र्मसेन कहेवो. ॥ ६०० ॥ पछी स्वजन अने पद्मावतीसहित वाजित्रो वागते छते राजा दानशाळामां गयो. ॥ १ ॥ ( त्यां ) यक्षनुं वचन हृदयमां याद करी पाषाणरूप रत्नसारने हर्षथी यथाविधि स्नान कराव्युं. ॥ २ ॥ पछी पद्मावती राणी पोताना पुत्रने खोळामां लइ हृदयमां नमस्कार स्मरी नीचे प्रमाणे बोली. ॥ ३ ॥ हे लोकपाळो ! सूर्य विगेरे ग्रहो ! हे सघळा क्षेत्रपाळो ! हे सघळा वैमानिक देवो ! जो मन वचन अने कर्मथी मारुं शियळ निर्मळ होय तो मारा हस्तस्पर्शथी मंत्रिराज सचेतन थाओ ? ॥ ५ ॥ एम कही हस्तथी स्पर्श थयेल ते जेनो एवो रत्नसार सचे

न्नचेतनः ॥ रत्नसारः समुत्तस्थौ । सुप्तोत्थित इव द्रुतं ॥ ६ ॥ प्रमोदमेदुरो राजा । समालिंग्याथ मंत्रिणं ॥ हर्षाश्रुश्रेणिसंदोहैः । स्नपयामास तं तदा ॥ ७ ॥ पुरासीन्नृपतेर्हर्षः । पुत्रजन्मसमुद्भवः पतिता मंत्रिसंगे तु । घृतपूरोपरि शर्करा ॥ ८ ॥ चित्रसेनस्ततो राजा । रत्नसारसमन्वितः ॥ राज्यं पालयते सम्यग् । धर्मकर्मपरायणः ॥ ९ ॥ शिष्टानां पालने दक्षो । दुष्टानां निग्रहक्षमः ॥ दानपुण्यक्रियायोगा—त्कीर्तिं स्वां व्यतनोन्नृपः ॥ १० ॥ ततो राजा च मंत्री च । जातौ धर्मपरायणौ ॥ राज्ञी पद्मावती सापि । विशेषाद्धर्ममातनोत ॥ ११ ॥ अन्येद्युस्तं सभासीनं । नृपं मंत्रिसमन्वितं

---

थइ निद्रामांथी ऊठे तेम तुरत ऊभो थयो. ॥ ६ ॥ हवे हर्षित थयेला राजाए मंत्रिने आलिंगन दइ हर्षाश्रु । समूहथी तेने स्नान कराव्युं. ॥ ७ ॥ पुत्रजन्मथी राजाने पहेलां हर्ष तो हतोज (अने) मंत्रिनी संगतिथी घेवरपर साकर (जेवुं थयुं). ॥ ८ पछी चित्रसेन राजा रत्नसार सहित धर्म कार्यमां परायण (थयो थको) सुखे राज्य करवा लाग्यो. ॥ ९ ॥ प्रियोने पाळवामां चतुर (अने) दुष्टोने शिक्षा (करवामां) धीर एवा राजाए दान आदि पुण्यक्रियाना योगथी पोतानी कीर्ति प्रसारी ॥ १० ॥ पछी राजा अने मंत्री धर्ममां लीन थया, (अने) ते

॥ नरः कोऽपि समागत्य । कथयामासिवानिति ॥ १२ ॥ देव सिंहपुरस्वामी । नृपतिः सिंहशेखरः ॥ गर्विष्ठो निजसैन्येन । नोऽस्ति सीमाविनाशकः ॥ १३ ॥ स ददाति न नो दंडं । सेवां नैव करोति च ॥ लुंटति पांथवित्तादि । गर्वप्रोद्धतकंधरः ॥ १४ ॥ श्रुत्वा तस्य मुखादेवं । चित्रसेनोऽवनीपतिः ॥ कोपाटोपकरालाद्यो—ऽवादयद्युद्धडिंडिमं ॥ १५ ॥ श्रुत्वा भेरीरवं वीरा । युद्धायायुधसंयुताः ॥ समुत्थिता बभूवुस्ते । यमभृत्या इवाभितः ॥ १६ ॥ चतुरंगचमूयुक्त—श्चित्रसेनो नरेश्वरः

पद्मावती राणी पण विशेषे करी धर्म करवा लागी. ॥ ११ ॥ एक दिवस मंत्रिसहित सभामां बेठेला राजाने कोइ माणसे आवी कह्युं के, ॥ १२ ॥ हे देव! सिंहपुरनो स्वामी सिंहशेखर राजा पोताना सैन्यथी गर्विष्ट ( थयो थको ) आपणी सीमानो विनाश करे छे. ॥ १३ ॥ गर्वथी उंचा थयेला छे स्कंध जेना एवो ते दंड देतो नथी, सेवा करतो नथी, अने मुसाफरोनां धन विगेरे लुंटे छे. ॥ १४ ॥ तेना मुखथी एम सांभळी कोपना समूहथी भयंकर थइ छे आंख जेनी एवा चित्रसेननृपतिए युद्धनो डंको वजडाव्यो. ॥ १५ ॥ भेरीनो अवाज सांभळी युद्धने माटे शस्त्रो सहित यमना माणसो जेवा वीरो चारे तरफथी भेगा थया. ॥ १६ ॥ त्यारपछी चतुरंगी सैन्य स-

॥ वादित्रनादसंयुक्त—श्चचाल स्वपुरात्ततः ॥ १७ ॥ महापराक्रमी नृपः । स प्रयाणैः क्रमात्ततः ॥
संप्राप्तो दंडकारण्ये । जनानां भयदेऽभितः ॥ १८ ॥ निशीथसमये प्राप्ते । सुप्ते सैन्यगणे समे ॥
अकस्मात्क्रंदनारावं । श्रुत्वा नृपो व्यचिंतयत ॥ १९ ॥ अत्र निर्मानुषाटव्यां । श्रूयते किमिदं ख
लु ॥ एवं विमृश्य खड्ग म । समादाय समुत्थितः ॥ २० ॥ गतः शब्दानुसारेण । पृथिवीं कियती-
मसौ ॥ तावत्तरोरधोभागे । ददर्शैकं नरं नृपः ॥ २१ ॥ बद्धं निगडबंधेन । कीलितं लोहकीलकैः
॥ दृष्ट्वा तं चिंतयामास । नृपोऽयं को वराककः ॥ २२ ॥ चित्रसेननगधीशो—ऽपृच्छत्तं पुरुषंप्रति

---

हित चित्रसेन राजा वाजित्रोना अवाज सहित पोताना शहेरथी रवाना थयो. ॥ १७ ॥ अनुक्रमे
प्रयाणथी ते पराक्रमी राजा मनुष्योने चारे तरफथी भय देनारा दन्डकारण्यमां आवी पहोंच्यो. ॥
॥ १८ ॥ रात्रिने समये सर्व सैन्यनो समूह सुते छते राजाए अकस्मात् रडवानो अवाज सांभळी
विचार्युं. ॥ १९ ॥ आ निर्जन अरण्यमां आ शुं संभळाय छे ! एम विचारी खड्ग लइ ते उभो
थयो. ॥ २० ॥ शब्दानुसारे केटलीक जमीन ते उळंगी गयो तेटलामां वृक्षनीचे एक माणसने
राजाए जोयो, ॥ २१ ॥ तेने बेडीथी बांधेलो तथा लोखंडना खीलाथी जडेलो जोइ राजा चिं·

॥ कोऽसि त्वं कथमापन्नो । ह्यवस्थामीदृशीं ननु ॥ २३ ॥ अथोचेऽसौ पुमानेवं । पीडया पीडितो-ऽपि सन् ॥ ममाश्चर्यमयीं वार्ता । शृणु त्वं पुरुषोत्तम ॥२४॥ बंधनान्मोचय पूर्वं मां । पीडां मेऽपनय द्रुतं ॥ यथा वच्मि स्ववृत्तांत—मुपकारिशिरोमणे ॥ २५ ॥ राज्ञा कृते तथा सोऽवक् । वैताढ्याभिधनगे ॥ शृंगारमुत्तरश्रेणे-रस्ति हेमपुरं पुरं ॥ २६ ॥ तत्र राजास्ति विख्यातो । विद्याधरशिरोमणिः ॥ दानादिगुणसंयुक्तः । ख्यातो हेमरथाभिधः ॥ २७ ॥ तत्प्रिया हेममालास्ति । हेममालेव

---

तववा लाग्यो के आ वराक कोण (हशे)? ॥ २२ ॥ हवे चित्रसेन राजाए ते पुरुषने पूछ्युं तुं कोण छे? तथा आवी अवस्थाने केम प्राप्त थयो छे? ॥२३॥ त्यारे ते पुरुष बोल्यो के हे उत्तम पुरुष! जो के हुं पीडाथी पीडाउं छुं छतां मारी आश्चर्यकारी वार्ता सांभळ? ॥२४॥ प्रथम मने बंधनथी मुक्त कर? (अने) मारी पीडा दूर कर? जेथी हे उपकारीओमां शिरोमणी! हुं मारुं वृत्तांत कहुं ॥२५॥ राजाए तेम करतां ते बोल्यो वैताढ्य नामना पर्वतपर उत्तम श्रेणिना अलंकाररूप हेमपुर (नामनुं) नगर छे. ॥२६॥ त्यां विद्याधरोमां शिरोमणी दान विगेरे गुणवाळो तथा प्रख्यात हेमरथ नामनो राजा छे. ॥२७॥ तेने हेमनी माळानी पेठे शोभती हेममाला प्रिया छे, तेनी कु-

शोभिता ॥ तत्कुक्षितः समुद्भूतो । हेममाली सुतोऽस्म्यहं ॥ २८ ॥ हेमचूलाप्रियायुक्तो—ऽतिष्ठं वै निजसद्मनि ॥ संसारोचितसौख्यानि । भुंजानोऽहं यथाविधि ॥ २९ ॥ कियत्यथो गते काले । समुत्पन्नावयोर्वरा ॥ उत्कंठा तीर्थयात्राया । भवनिस्तारिणी भृशं ॥ ३० ॥ प्रियया सहितो यावत्-विमानमधिरुह्य च ॥ गच्छंस्तीर्थंप्रति मार्गे । यावदत्राहमागतः ॥ ३१ ॥ तावत्पृष्ठे समायतो । मत्प्रियालुब्धमानसः ॥ रत्नचूडाभिधः खेटो । विद्याधरसुरैर्वृतः ॥ ३२ ॥ दुष्टात्मा खेचरोऽसौ मा—मत्र बध्ध्वा गतो द्रुतं ॥ वल्लभां मे समादाय । स्वकीयनगरे पुनः ॥ ३३ ॥ युग्मं ॥ निशम्येति वचस्त-

---

क्षिथी उत्पन्न थयेलो हुं हेममाली (नामनो) पुत्र छुं. ॥ २८ ॥ हुं (मारी) हेमचूला पत्निसहित संसारने योग्य सुखो यथाविधि भोगवतो पोताना घरमां रहेतो हतो ॥ २९ ॥ हवे केटलोक काळ व्यतित थतां अमने बन्नेने भयथी तारनारी तीर्थयात्रानी उत्कंठा थइ. ॥ ३० ॥ प्रियासहित जेवो हुं विमानमां चडी तीर्थ तरफ जतां मार्गमां अहिं आव्यो तेवामां पछाडे विद्याधरसुरोथी सहित रत्नचूड नामनो खेचर मारी प्रियामां लुब्ध चित्तवाळो (थयो थको) आव्यो. ॥ ३२ ॥ ते दुष्ट खेचर मने अहिं बांधी मारी प्रियाने लइ पोताना नगरमां नाशी गयो छे. ॥ ३३ ॥ तेनुं ए-

स्य । चित्रसेनो महीपतिः ॥ व्रणसंरोहिणीलेपाद् । द्रुतं सज्जीचकार तं ॥ ३४ ॥ नृपतेः पादयो॰
र्नत्वा । हेममाली व्यजिज्ञपत् ॥ मोचितोऽहं यथा देव । तथाप्यानय मत्प्रियां ॥ ३५ ॥ वृक्षो यथा
फलं पुष्पं । परोपकृतिहेतवे ॥ तथा सत्पुरुषः प्राणान् । धत्ते हि परहेतवे ॥ ३६ ॥ नृपस्तद्वचनं
श्रुत्वा । परोपकृतितत्परः ॥ तदारूढो विमानं त—त्तेनैव सहितो द्रुतं ॥ ३७ ॥ कियद्भूमीं गतो
याव—न्नृपस्तेनाथ संयुतः ॥ तावत्तं रत्नचूडं स । ददर्शैकतरुस्थितं ॥ ३८ ॥ हक्कितश्चित्रसेनेन ।
दुष्ट रे पारदारिक ॥ क्व गमिष्यसि मूढ त्वां । मारयिष्यामि संप्रति ॥ ३९ ॥ इति नृपवचः श्रुत्वा ।

---

वुं वचन सांभळी चित्रसेन राजाए तेने तुरतज व्रणसंरोहिणी लेपथी साजो कर्यो. ॥ ३४ ॥ (ह
वे) हेममालीए राजाना पगने नमी विनंति करी के हे देव ! जेम मने मुक्त कर्यो तेम मारी प्रि
याने पण लावो ? ॥ ३६ ॥ ते वचन सांभळी परोपकारमां तत्पर एवो राजा ते खेचरनी साथेज
तेज विमानमां चडी बेठो. ॥ ३७ ॥ जेवो ते तेनी साथे केटलीक भूमी सुधी गयो तेवामां ते
रत्नचूडने एक वृक्ष नीचे जोयो. ॥ ३८ ॥ चित्रसेने हांक मारी के हे दुष्ट ! हे परस्त्रीलंपट ! हे मूढ !
तुं क्यां जइश ? हुं हमणाज तने मारुं छुं ॥ ३९ ॥ एवी रीतनुं राजानुं वचन सांभळी बीजा खे॰

खेटा अन्ये पलायिताः ॥ रत्नचूडः स्थितश्चैकः । संग्रामाय तयान्वितः ॥ ४० ॥ संजातं दारुणं युद्धं । नृपतिखेटयोस्ततः ॥ जितो नृपेन तत्काल-मसौ विद्याधराधमः ॥ ४१ ॥ स मृत्युभयभीतोऽथ । मुखे कृत्वा तृणं तदा ॥ नत्वा नृपतिपादाब्जं । पुनरेवं व्यजिज्ञपत् ॥ ४२ ॥ स्वामिन् कांतिपुराधीश—सुतोऽहं रत्नचूडकः ॥ विद्यायाः साधनार्थं च । गतोऽद्रौ गंधमादने ॥ ४३ ॥ कृत्वा तत्साधनं तत्र । मित्रैश्च परिवारितः ॥ साश्चर्यामवनीं पश्यन् । गच्छंश्च गगनाध्वना ॥ ४४ ॥ मार्गे चैनं प्रियायुक्तं । दृष्टवान् हेममालिनं ॥ तस्या रूपं वरं दृष्ट्वा । मित्राग्रे च मयोदितं ॥ ४५ ॥ परीक्षे-

---

चरो पलायन करी गया, एक रत्नचूडज तेनी साथे युद्धमाटे रह्यो. ॥४०॥ पछी राजा अने खेचरनुं दारुण युद्ध थयुं. ( तेमां ) राजाए तत्काळ ते अधम विद्याधरने जीती लीधो. ॥ ४१ ॥ त्यारे ते मृत्युथी भयभीत थयेलो ( पोताना ) मुखमां तृण राखी नृपतिना चरणकमलने नमी विनंती करवा लाग्यो के, ॥ ४२ ॥ हे स्वामिन् कांतिपुरना राजानो रत्नचूड ( नामनो ) हुं पुत्र छु, अने विद्याना साधन माटे हुं गंधमादन पर्वतपर गयो हतो. ॥ ४३ ॥ त्यां तेनु साधन करी मित्रोसहित आश्चर्यपूर्ण पृथ्वी जोतो गगनमार्गे जतो हतो. ॥ ४४ ॥ मार्गमां ते हेममालीने प्रि-

ऽहमथो विद्यां । यूयं पश्यत कौतुकं ॥ इत्युक्त्वाथ मया मुक्त-विद्यया विह्वला ह्यसौ ॥ ४६ ॥ जाता स्मेरमुखांभोजा । लग्ना सा हसितुं भृशं ॥ सुहृदो मे तया दृष्ट्वा । तां तदा विस्मिता द्रुतं ॥ ॥ ४७ ॥ हसंतीं स्वां प्रियां दृष्ट्वा । कुपितो हेममाल्यसौ ॥ विरूपवचनैर्गालिं । दातुं लग्नो मम ध्रुवं ॥ ४८ ॥ तदा कोपान्मयैषोऽरं । बद्धो निगमितस्तथा ॥ तत्प्रियामपि लात्वाहं । स्थितो देव वनांतरे ॥ ४९ ॥ एषा पृष्टा मया देव । कासि त्वं कस्य वा सुता ॥ ततस्तदुक्तवृत्तांताद् । ज्ञाता

---

यासहित जोयो, तेणीनुं सुंदररूप जोइ में मित्रने कह्युं. ॥ ४५ ॥ हुं मारी विद्यानी परीक्षा करुं छुं. तमो कौतुक जुओ ? एम कहीने मारी मूकेली विद्याथी ते विह्वल थइ. ॥ ४६ ॥ स्मितसहित मुखकमळवाळी थइने ते बहु हसवा लागी, मारा मित्रो तेणीने एम जोइ विस्मय पाम्या. ॥४७॥ पोतानी प्रियाने हसती जोइ कोपायमान थयेलो हेममाली अपशब्दोथी मने गाळो देवा लाग्यो. ॥ ४८ ॥ त्यारे कोपथी में तेने बांध्यो तथा जड्यो, अने हुं तेनी प्रियाने लइ हे देव ! बीजा वनमां रह्यो. ॥ ४९ ॥ हे देव ! में तेणीने पुछ्युं के तुं कोण छे ? अने कोनी पुत्री छो ? त्यारे तेणे कहेला वृत्तांतथी ते गोत्रकन्या मालुम पडी. ॥ ५० ॥ तारी हांक सांभळीने ते मारा मित्रो

सा गोत्रकन्यका ॥ ५० ॥ श्रुत्वा त्वदीयहक्कां ते । नष्टा मे सुहृदो भयात् ॥ यतः सिंहनिनादेन । त्रासयंतीह कुंजराः ॥ ५१ ॥ मया शीलव्रतं पूर्वं । गृहीतं गुरुसन्निधौ ॥ तदेषा भगिनीतुल्या । ममास्ति सर्वथा सखे ॥ ५२ ॥ रत्नचूडगिरं श्रुत्वा । चित्रसेनो नरेश्वरः ॥ मुदा प्रशंसयामास । धर्मिणं तं विशुद्धधीः ॥ ५३ ॥ उपकारपरा धन्या । धन्या दानपरा नराः ॥ परकार्यकरा धन्या । धन्या शीलधरास्तथा ॥ ५४ ॥ हेममाली नमस्कृत्य । नृपपादांबुजं ततः ॥ कथयामास राजेंद्रं । विनयाद्दामनीजवन् ॥ ५५ ॥ जीवदानं त्वया स्वामिन् । दत्तमस्माकमद्य भोः ॥ कुलं हेमरथस्यापि ।

---

भयथी नाशी गया, कारणके सिंहनी त्राडथी हस्तिओ खरेखर भयभीत थाय छे. ॥ ५१ ॥ में पूर्वे गुरुपासे शीलव्रत लीधेलुं छे. तेथी हे मित्र ! ते मारी बेन तुल्य छे. ॥ ५२ ॥ रत्नचूडनी वाणी सांभळी पवित्र बुद्धिवाळा चित्रसेनराजाए हर्षथी ते साधर्मिकनी प्रशंसा करी. ॥ ५३ ॥ धन्य छे उपकार करनाराओने ! धन्य छे दानमां तत्पर पुरुषोने ! धन्य छे परकार्यकारकोने ! तथा धन्य छे शीलधारीओने ! ॥ ५४ ॥ त्यारपछी विनयथी राजाना चरणकमळने नमन करी हेममाळी बोल्यो, ॥ ५५ ॥ हे स्वामिन् ! तें अमोने जीवितदान आप्युं छे. तथा हेमरथनुं कुळ बुडतुं तें

संभ्रमहृद्धृतं त्वया ॥ ५६ ॥ अथ प्रसद्य मे स्वामिन् । विद्ये मत्तो गृहाण भोः ॥ येनाहमनृणी भवं । गच्छामि चपलं तव ॥ ५७ ॥ प्रतिपन्नं कुमारेण । तत्तस्याग्रहतस्ततः ॥ परेषां प्रार्थनाभंगं । कुर्वंति न हि सज्जनाः ॥ ५८ ॥ ततो विद्याधरेशोऽसौ । हेममाली ददौ तदा ॥ द्वे विद्ये दुर्लभे तस्मै । हर्षपूरितमानसः ॥ ५९ ॥ इच्छासंचारपर्यंकं । दंडं शत्रुंजयाभिधं ॥ नृपाय प्रददौ हेममाली विद्याधरेश्वरः ॥ ६० ॥ पर्यंकं दंडरत्नं च ॥ नृप आदाय हर्षितः ॥ प्रशंसां तस्य खेटस्य । कुरुतेस्म पुनः पुनः ॥ ६१ ॥ रत्नचूडो नमन्मौलि—र्जगादाथ नृपं प्रति ॥ स्वामिन् रूपपरावर्त—गु

तार्युं छे. ॥ ५६ ॥ तेथी मारापर प्रसाद करीने हे स्वामिन्! मारीपासेथी बे विद्या ग्रहण करो? जेथी हुं तुरत आपनो अनृणी थाउं. ॥५७॥ त्यारे तेना आग्रहथी कुमारे ते कबुल कर्युं कारण के सज्जनो बीजाओनी प्रार्थनानो भंग करता नथी. ॥५८॥ पछी हर्षथी पूर्ण चित्तवाळा ते हेममाळीविद्याधरे बे दुर्लभ विद्या तेने दीधी. ॥ ५९ ॥ इच्छाथी चालनारो पलंग अने शत्रुंजय नामनो दंड ( ए बंने ) हेममाळी विद्याधरे राजाने दीधां. ॥ ६० ॥ राजा (पण) ते पलंग अने दंडरत्न लइ हर्ष पामी ते खेचरनी वारंवार प्रशंसा करवा लाग्यो. ॥६१॥ हवे नमेल छे मस्तक जेनुं एवो

टिकां मे गृहाण भोः ॥ ६२ ॥ गुटिकां तां समादाय । नृपो विद्याधरेशयोः ॥ परस्परं तयोः प्रीतिं । कारयामास कोविदः ॥ ६३ ॥ प्रभातसमये जाते । तौ द्वौ विद्याधरावथ ॥ नृपपालं नमस्कृत्य । गतौ स्वं स्वं पुरंप्रति ॥६४॥ नृपः सैन्ये समायातः । पल्यंकादिसमन्वितः ॥ चतुरंगचमूयुक्तो । यावद्गच्छति चाग्रतः ॥ ६५ ॥ तावत्सिंहपुराधीश—प्रेषितो दूत आगतः ॥ चित्रसेननृपं नत्वो—वाच स्वस्वामिनोदितं ॥ ६६ ॥ युग्मं ॥ वदति मन्मुखात्त्वां च । स्वामी मे रत्नशेखरः ॥ मत्सीमनि त्वया नैवा—गंतव्यं सुखमिच्छता ॥ ६७ ॥ दूतस्येति वचः श्रुत्वा । कुपितो नृपतिरवक् ॥ रे रे अवध्यदूत-

---

रत्नचूड राजाप्रत्ये बोल्यो मारी रूपपरावर्तन गुटिका ग्रहण करो ? ॥ ६२ ॥ विद्वान् राजाए ते गुटिका लइ ते बन्ने विद्याधरोने परस्पर प्रीति करावी. ॥ ६३ ॥ प्रभात समय थतां राजाने नमस्कार करीने ते बन्ने विद्याधरो पोतपोताना नगरमां गया. ॥ ६४ ॥ राजा ( पण ) सैन्यमां आवी ते पलंगसहित तथा चतुरंगी सेना सहित जेटलामां आगळ चाले छे तेटलामां सिंहपुरना राजाए मोकलेलो ( एक ) दूत आव्यो, ( ते ) चित्रसेन राजाने नमीने पोताना स्वामीए कहेलुं कहेवा लाग्यो. ॥ ६५–६६ ॥ मारो स्वामी रत्नशेखर मारे मुखेथी तने कहेवरावे छे के जो तु सुख इ-

स्त्वं । गच्छ गच्छ ममाग्रतः ॥ ६८ ॥ कथनीयं स्वनृपाग्रे । सन्नह्य स्वं स्थिरीभव ॥ चित्रसेनः समा-
याति । युद्धायाथ समुत्सुकः ॥ ६९ ॥ गत्वा दूतेन विज्ञप्तो । रत्नशेखरनृपतिः ॥ चित्रसेनः समा-
याति । भूरिसैन्यसमन्वितः ॥ ७० ॥ एतद्वचनमाकर्ण्य । कोपात्प्रस्फुरिताधरः ॥ चचाल सन्मुखं सो-
ऽपि । क्रुद्धः पंचाननो यथा ॥ ७१ ॥ उभयोः सैन्ययोर्जातः । संघट्टोऽथ परस्परं ॥ योद्धा युद्धा-
य सन्नद्धा । लग्ना योध्धुं मिथोऽभितः ॥ ७२ ॥ रथिका रथिभिः सार्धं । सादिनः सादिभिः सह ॥
पत्तयः पत्तिभिः सार्धं । युध्यंते क्रोधदुर्धराः ॥ ७३ ॥ भटमुक्तशरव्रातै—श्छादितं गगनांगणं ॥ श्र-

---

छतो होय तो तारे मारी सीमामां आववुं नहि. ॥ ६७ ॥ दूतनुं एवुं वचन सांभळी, कुपित थयेलो
राजा बोल्यो अरे अवध्य दुत ! मारी पासेथी जा जा ? ॥ ६८ ॥ तारा राजाने कहेवुं के शस्त्र स-
जी तैयार था ? युद्धनेमाटे उत्सुक एवो चित्रसेन आवे छे. ॥ ६९ ॥ दुते रत्नशेखर राजाने
विनव्युं के बहु सैन्यसहित चित्रसेन आवे छे. ॥ ७० ॥ ए वचन सांभळी सिंहनी पेठे कोपथी
फडफडे छे होठ जेना एवो ते पण सन्मुख आव्यो. ॥ ७१ ॥ हवे बन्ने सैन्यनो परस्पर भेटो थयो,
युद्धने माटे तैयार थयेला योद्धाओ परस्पर लडवा लाग्या. ॥ ७२ ॥ क्रोधथी नहिं जीताय एवा

कालेऽपि ततो जातं । दुर्दिनं परितो द्रुतं ॥ १४ ॥ यथा विंध्यावनीपाला ! गजा युध्यंति दुर्धराः ॥ तथा सैन्यद्वयोर्जातं । तद्युद्धं जनभीतिदं ॥ १५ ॥ दृष्ट्वा संग्रामकौशल्यं । चित्रसेनो नराधिपः ॥ मुदा प्रशंसयामास । रत्नशेखरसैनिकान् ॥ १६ ॥ यदा सिंहपुरीनाथः । संग्रामान्न निवर्तते ॥ चित्र-सेनस्तदा कोपा—द्दंडं जग्राह तं करे ॥ १७ ॥ परमेष्टीन् हृदि स्मृत्वा । तथा विद्याधरं गुरुं ॥ दंड-मुमोच तं शत्रु—सैनिकोपरि स क्रुधा ॥ १८ ॥ वैरिसेना ततः सर्वा । पतिता भूमिमंडले ॥ एक

---

रथीओ रथीनी साथे घोडेस्वारो घोडेस्वारोनी साथे अने पाळाओ पाळानी साथे लडवा लाग्या. ॥ १३॥ योद्धाओए मूकेला बाणना समूहथी गगनांगण छवाइ गयुं. तेथी अकाळे पण दुर्दिवस देखा-वा लाग्यो. ॥१४॥ जेम विंध्याचळमां रहेता बळवान् हाथीओ लडे तेवीरीते मनुष्योने भय आपनारुं बन्ने सैन्योनुं युद्ध थयुं. ॥ १५ ॥ चित्रसेनराजाए रत्नशेखरना सुभटोनुं युद्ध कौशल्य जोइ हर्षथी प्रशंसा करी. ॥ १६ ॥ ज्यारे सिंहपुरनो राजा युद्धथी हठ्यो नहि त्यारे चित्रसेने कोपथी हाथमां दंड लीधो. ॥ १७ ॥ ( पंच ) परमेष्टीने तथा विद्याधर गुरुने हृदयमां स्मरी तेणे ते दंड क्रोधथी शत्रुना सुभटोपर मूक्यो. ॥ १८ ॥ त्यारे शत्रुनी सघळी सेना पृथ्वीतळपर पडी मात्र, एक रत्न-

एव स्थितस्तत्र । रत्नशेखरभूपतिः ॥ ७९ ॥ अश्वात्सोऽथ समुत्तीर्य । विनयान्नतमस्तकः ॥ चित्रसेनं ननामाशु । न स्यात्प्रीतिर्विनयं विना ॥८०॥ करौ द्वौ मुकुलीकृत्य । चित्रसेनं जगाद स ॥ अपराधिषु यो दंड—स्तं दंडं कुरु मे प्रभो ॥ ८१ ॥ एवं श्रुत्वा स भूपालः । कृपापूरितमानसः ॥ पश्चाज्जग्राह तं दंडं । भटाः सर्वे समुत्थिताः ॥ ८२ ॥ रत्नशेखरमादाय । चित्रसेनो नरेश्वरः ॥ गत्वा सिंहपुरे तत्र । स्थापयामास मानतः ॥ ८३ ॥ विधाय सेवकं तं च । मित्रतुल्यं नरेश्वरः ॥ चरितश्चित्रसेनोऽथ । ससैन्यः स्वपुरंप्रति ॥ ८४ ॥ वाद्यमानेषु वाद्येषु । चतुर्गसैन्यसंयुतः ॥ नानादे-

---

शेखर राजा उभो रह्यो. ॥ ७९ ॥ हवे विनयथी नमेल छे मस्तक जेनुं एवा तेणे अश्वथी उतरी तुरतज चित्रसेनने प्रणाम कर्या, विनयविना प्रीति थती नथी. ॥८०॥ ते बन्ने हाथ जोडी चित्रसेन प्रत्ये बोल्यो हे प्रभु! अपराधीजनोनो जे दंड होय ते मारो करो ? ॥ ८१ ॥ एम सांभळी कृपाळु चित्तवाळा राजाए ते दंड पाछो लीधो, ( तेथी ) सघळा सुभटो उभा थया. ॥ ८२ ॥ ( त्यारपछी ) चित्रसेन राजाए रत्नशेखरने लइ सिंहपुरमां जइ तेने मानथी त्यां स्थापन कर्यो. अने पछी चित्रसेनराजा तेने मित्रतुल्य सेवक करी सैन्यसहित पोताना शहेर तरफ चाल्यो. ॥ ८४ ॥ वाजित्रो

शनराधीशै—र्नम्यमानांह्रिपंकजः ॥ ८५ ॥ अविलंबप्रयाणैः स । समागात्स्वपुरांतिकं ॥ मंत्रिणा रत्नसारेण । श्रुत स्वामिसमागमं ॥ ८६ ॥ युग्मं ॥ सोऽथ शृंगारयामास वसंतपुरपत्तनं ॥ पद्मावत्यपि संतुष्टा श्रुत्वा भर्तुः समागमं ॥ ८७ ॥ सन्मुखश्चलितो मंत्री । परिवारसमन्वितः ॥ पुरीलोकः समस्तोऽपि । हर्षपूरितमानसः ॥ ८८ ॥ उपायनं समादाय । मिलितो मंत्रिपुंगवः ॥ भूरिस्नेहयुतस्तत्र । पपात नृपपादयोः ॥ ८९ ॥ नृपेनापि मुदा सोऽग्रा—लिंगितः स्नेहनिर्भरं ॥ कुशलप्रश्नपूर्वं च निजार्धासनमासितः ॥ ९० ॥ स्नेहयुक्तगिरा राजा । तमानंद्य मुहुर्मुहुः ॥ उप

---

वागते छते चतुरंगी सैन्यसहित नाना प्रकारनां देशना राजाओथी नमायेल छे जेना चरणकमल एवो ते अविलंबप्रयाणथी पोताना नगरनजीक आव्यो, रत्नसार मंत्रिए ( पोताना ) स्वामिनु आगमन सांभळ्यु. ॥ ८५–८६ ॥ ( तेथी ) तेणे वसंतपुर शहेर शणगार्युं, पद्मावती पण पतिनुं आगमन सांभळी संतोष पामी. ॥ ८७ ॥ हवे मंत्री परिवार सहित तथा हर्षपूर्ण चित्तवाळी सघळी प्रजा सामी चाली. ॥ ८८ ॥ ते उत्तम मंत्री घणा स्नेहसहित उपायन लइ तेने मळ्यो, अने तेना चरणकमलमां पड्यो. ॥ ८९ ॥ त्यारे राजाए पण हर्षथी स्नेहसहित तेने आलिंगन कर्युं,

कारं हृदि ध्यायन् । तत्कृतं तं शशंस सः ॥ ९१ ॥ मंत्रिराजसमायुक्तः । ससैन्यश्चलितो नृपः ॥ प
श्यन्नारामगां शोभां । प्राप्तो गोपुरसन्निधौ ॥९२॥ धर्मसेनकुमारस्तु । तदागात्सन्मुखं मुदा ॥ पितुः
पादौ ननामासौ । भूतलन्यस्तमस्तकः ॥९३॥ नृपेनापि स चालिंगि । गाढं प्रणयपूर्वकं ॥ प्रमोदा-
श्रुभिरेतस्य । शोभितो विरहानलः ॥ ९४ ॥ सुतरत्नं समादाय । निजोत्संगे महीपतिः ॥ गजारूढः
क्रमेणाय । प्रवेशं चाकरोत्पुरे ॥ ९५ ॥ वादित्रैर्वाद्यमानैश्च । भटानां जयजयारवै ॥ शब्दाद्वैतम-

---

अने कुशल पूछी पोताना अर्धा आसनपर बेसाड्यो. ॥ ९० ॥ राजा वारंवार प्रीतियुक्त वाणीथी
तेने आनंद पमाडी तेणे करेला उपकार हृदयमां विचारी तेने प्रशंसवा लाग्यो. ॥ ९१ ॥ (त्या-
रपछी) मंत्रिराज सहित तथा सैन्यसहित बगीचाओनी शोभा जोतो चालतो राजा दरवाजापासे
आव्यो. ॥ ९२ ॥ त्यारे धर्मसेन कुमार हर्षथी सामो आव्यो. अने पृथ्वीतलपर मस्तक नमावी
पिताना पगने प्रणाम कर्या. ॥ ९३ ॥ राजाए पण प्रेमपूर्वक तेने गाढ आलिंगन कर्युं, (तथा)
आनंदाश्रुथी तेनो विरहरूपी अग्नि शांत कर्यो. ॥ ९४ ॥ हवे पुत्ररत्नने पोताना खोळामां लइ
राजाए हाथीपर चडी शहेरमां प्रवेश कर्यो. ॥ ९५ ॥ वाजित्रोना वागवाथी तथा भटोना जयजय

यं कुर्वन् । नृपो मंदिरमागतः ॥ ९६ ॥ सिंहासने समासीनः । कृतमंगलकौतुकः ॥ विसृज्य सैनि-
कान् सर्वान् । गतः स्वांतःपुरेऽथ सः ॥ ९७ ॥ दृष्टे प्राणप्रिये राज्ञी । सहसाथ समुत्थिता ॥ पाद-
पद्मं नमस्कृत्य । तस्य सा समुपाविशत् ॥ ९८ ॥ त्रयोऽपि मिलितास्तत्र । राजा राज्ञी च मंत्रिराट्
॥ भावयामासुरानंदा—द्दानशीलादिभावनाः ॥ ९९ ॥ गृहीतं तैश्च सम्यक्त्वं । परिग्रहप्रमाणकं ॥
भद्रकत्वात् त्रयो जाता । गुरुसेवापरायणाः ॥ १०० ॥ पुण्यवंतस्त्रयस्तेऽथ । पुण्यं कुर्वंत्यहर्निशं ॥

---

शब्दोथी अद्वैतपणुं करतो राजा महेलमां आव्यो. ॥ ९६ ॥ ( त्यां ) करेल छे मंगळकौतुक जेणे
एवो ते सिंहासन उपर बेसी सर्व सुभटोने विसर्जन करी पोताना अंतःपुरमां गयो. ॥ ९७ ॥
( पोताना ) प्राणपतिने जोइ राणी एकदम उभी थइ तेना चरणकमलने नमी ( पछी ) बेठी.
॥ ९८ ॥ त्यां राजा राणी अने प्रधान ए त्रणे मळ्या, ( अने ) आनंदथी दान शील विगेरेनी
भावना भाववा लाग्या. ॥ ९९ ॥ तथा तेओए परिग्रहना प्रमाणसहित सम्यक्त्व ग्रहण कर्युं. (त-
था ) ए त्रणे भद्रकपणाथी गुरुसेवामां तत्पर थया. ॥ १०० ॥ एवीरीते पुण्यवंत एवा ते त्रणे ह-
मेशां पुण्य करे छे, ( तथा ) निर्मळ चित्तवाळा तेओ नीतिथी पोतानुं राज्य पाळे छे. ॥ १ ॥ ए

पालयंति निजं राज्यं । नीत्या निर्मलमानसाः ॥ १ ॥ अन्यदा नृपनाशेन । तयोरग्रे निवादना ॥ वार्ता वांछितचारस्य । पर्यंकस्य मनोहरा ॥ २ ॥ तत् श्रुत्वा विस्मिता पद्मा—वती प्रोवाच हर्षिता शृणु मे वचनं स्वामिन् । यदि सत्यं त्वयोदितं ॥ ३ ॥ नानाविधानि तीर्थानि । विद्यंते शाश्वतानि हि ॥ मंदिरानि जिनेंद्राणां । बिंबैश्चातिशायिभिः ॥ ४ ॥ तानि सर्वाणि लोकेऽस्मिन् । वंदनी· यानि भावतः ॥ अस्माभिः खलु लब्धायां । सामग्र्यां कः प्रमाद्यति ॥ ५ ॥ युग्मं ॥ राजा जगाद हे देवि । मे वचो नान्यथा भवेत ॥ दृष्टः परीक्षितः पूर्व—मधुनायं परीक्ष्यते ॥ ६ ॥ अथ पूजो·

---

क दिवस राजाए इच्छित ( स्थाने ) लइ जनार पलंगनी मनोहर वार्ता ते बन्नेने कही. ॥ २ ॥ ते सांभळी सानंदाश्चर्य पामेली पद्मावती बोली हे स्वामिन ! आपनुं कहेवुं सत्य होय तो मारुं वचन सांभळो ? ॥ ३ ॥ आ लोकमां सघळा अतिशयोवाळा जिनेश्वरोना बिंबथी शोभितां अनेक शाश्वतां तीर्थो छे. ते सघळां आपणे भावथी वांदवा. छती सामग्रीए आळस कोण करे ? ॥४-५॥ राजा बोल्यो हे देवी ! मारुं वचन अन्यथा होय नहि प्रथम दंडनी परीक्षा करी छे, हवे आनी परिक्षा थशे. ॥ ६ ॥ पछी ते बन्ने पूजानी सामग्रीओ विगेरे लइ नानाप्रकारनां तीर्थने नमवानी

पकरणादि । गृहीत्वा च त्रयोऽपि ते ॥ द्रुतं पर्यंकमारूढा । नानातीर्थनिनंसया ॥ ६ ॥ पर्यंकश्च ततोऽचाली—द्वायुवेगान्नभोऽध्वनि ॥ गच्छंतस्ते क्रमेणाथ । प्राप्ता अष्टापदे गिरौ ॥ ७ ॥ तत्रास्ति कानकं चैत्यं । पूर्वाभिमुखसंस्थितं ॥ गव्यूतित्रितयोत्तुंगं । भरतेश्वरकारितं ॥ ८ ॥ द्वे बिंबे पूर्वभागेऽत्र । याम्यां चत्वारि संति च ॥ पश्चिमे दश बिंबानि । कीर्तितान्युत्तरेऽष्ट च ॥ ९ ॥ चतुर्विंशतितीर्थेश—बिंबानीति मनोहरे ॥ यथावर्णप्रमाणानि । राजंते तत्र मंदिरे ॥ १० ॥ चित्रसेनो नृपो दृष्ट्वा । प्रियामित्रसमन्वितः ॥ जिनचैत्यं तदुत्तुंगं । प्राप्तो हर्षं वचोऽतिगं ॥ ११ ॥ प्रतिमाः

---

इछाथी तुरत पलंगपर चड्या. ॥ ६ ॥ त्यारे ते पलंग वायुना वेगथी आकाशमार्गे चाल्यो, अनुक्रमे जतां तेओ अष्टापद पर्वतपर आव्या. ॥ ७ ॥ त्यां भरतमहाराजे करावेलुं पूर्व सन्मुख रहेलुं त्रणगाउ उंचुं सोनानुं देवालय छे. ॥ ८ ॥ तेमां पूर्वभागमां बे प्रतिमा दक्षिणमां चार, पश्चिममां दश अने उतरमां आठ ( प्रतिमा ) कही छे. ॥ ९ ॥ एवीरीते ते मनोहर मंदिरमां चोवीसे तीर्थंकरोना जेवा रंग अने प्रमाण छे तेवा बिंबो शोभे छे. ॥ १० ॥ चित्रसेन राजा ( पोतानी ) प्रिया अने मित्र सहित ते उंचुं जिनालय जोइ वचनथी कही न शकाय तेवो हर्ष पाम्यो.

पूजयामासु—स्ततस्ताश्च वधोऽपि ते ॥ कुंकुमैर्घनसारैश्च । नानामाल्यैः सुगंधिभिः ॥ १२ ॥ शक्र
स्तवेन संस्तुत्य । भावनानस्त्रयोऽपि ते ॥ जिनानां पुरतश्चक्रु—र्नृत्यं वाद्यसमन्वितं ॥ १३ ॥ हर्ष
प्रकर्षसंयुक्ताः । कुर्वाणा जिनपूजनं ॥ विशुद्धभावनोपेता—स्तत्र कालं कियत्स्थिताः ॥ १४ ॥
ततस्तेऽथ विनिर्गत्य । गता नंदीश्वरंप्रति ॥ तत्रापि तैर्जिनेंद्राणां । कृता पूजाप्रभावना ॥ १५ ॥
कर्पूरागुरुकस्तूरी—घनसारविमिश्रितैः ॥ कुंकुमैरर्चयामासु—स्तत्रार्हत्प्रतिमाश्च ते ॥ १६ ॥ आरा

॥ ११ ॥ पछी ते त्रणेए घनसार कंकुथी तथा नानाप्रकारनी सुगंधी माळाओथी ते प्रतिमानी पूजा करी. ॥ १२ ॥ (पछी) भावथी ते त्रणेए शक्रस्तवथी स्तुति करी जिनेश्वरपासे वाजत्रसहित नृत्यु कर्युं. ॥ १३ ॥ (एवीरीते) उत्कृष्ट हर्षसहित विशुद्ध भाववाळा (ते वणे) जिनेश्वरोनुं पूजन करता केटलोक समय त्यां रह्या. ॥ १४ ॥ पछी (त्यांथी) तेओ नीकळी नंदीश्वर गया त्यां पण तेओए जिनेश्वरोनी पूजा प्रभावना (वगेरे) करी. ॥ १५ ॥ तथा तेओए कपूर अगुरु कस्तुरी अने घनसारथी मिश्रित थयेलां कुंकुमथी अरिहंतनी प्रतिमानी स्थापना करी. ॥ १६ ॥ वळी तेओए आरात्रिक तथा मंगळदीवो करी हर्षथी जिनेश्वरोपर ध्वजारोपण कर्युं. ॥ १७ ॥ एवी

लिकं तथा चैते । कृत्वा मंगलदीपकं ॥ जिनानां पुरतश्चक्रु—र्ध्वजवारोपणकं मुदा ॥ १७ ॥ एवं विविधतीर्थानां । कृत्वा यात्रां प्रहर्षिताः ॥ क्रमेण ते समायाता । वसंतपुरपत्तने ॥१८॥ एवं परीक्ष्य पर्यंकं । संप्राप्ता निजमंदिरे ॥ सुखान्यनुभवंति ते । जिनबिंबार्चने रताः ॥ १९ ॥ पुण्यप्रभावतो राज्यं । वृद्धिं प्रापद्दिने दिने ॥ चित्रसेननरेंद्रस्य । वैरिवारविवर्जितं ॥ २० ॥ कियत्यपि गते काले —ऽन्यदा संसदि तस्थुषः ॥ नृपस्याग्रे समागत्या—रामिकश्चेत्यवग् मुदा ॥ २१ ॥ स्वामिन् मनोरमोद्याने । दमसारो मुनीश्वरः ॥ पंचज्ञानसमायुक्तः । प्राप्तोऽस्ति मुनिभिर्वृतः ॥ २२ ॥ तत् श्रुत्वाथ

---

रीते हर्षित थयेला तेओ विविध तीर्थोनी यात्रा करी वसंतपुर नगरमां आव्या. ॥ १८ ॥ एवीरीते पलंगनी परीक्षा करीने पोताने घेर आवेला तेओ जिनप्रतिमानी पूजामां लीन (थया थका) सुखो अनुभववा लाग्या. ॥ १९ ॥ वैरीओना समूहथी विवर्जित थयेलुं चित्रसेन राजानुं राज्य पुण्यना प्रभावथी प्रतिदिन वृद्धि पाम्युं. ॥ २० ॥ (एवीरीते) केटलोक समय जतां एक दिवस सभामां बेठेला राजापासे आरामिक आवी हर्षथी बोल्यो, ॥ २१ ॥ हे स्वामिन् मनोरम (नामना) उद्यानमां पांचमा ज्ञानवाळा (तथा) मुनिओथी घेरायेला एवा दमसार मुनिराज पधार्या

महीनाथो । वस्त्रालंकरणादिकं ॥ संतुष्टः प्रददौ तस्मै । मुन्यागमनशंसिने ॥ २३ ॥ कृत्वा सकलत्र- सामग्रीं । राज्ञीमंत्रिसमन्वितः ॥ चलितो भूपतिस्तत्र । मुनिवंदनहेतवे ॥ २५ ॥ मुनेः पादौ नमस्कृत्य । परिच्छदसमन्वितः ॥ स्थितोऽसावुचिते स्थाने । विनयेन कृतांजलिः ॥ २६ ॥ मुनिना मधुरध्वानैः । प्रारब्धा धर्मदेशना ॥ भवपाथोनिधेर्मध्या—त्तारणाय तरीनिभा ॥ २७ ॥ कषायाः कटवो वृक्षा । दुर्ध्यानं तत्प्रसूनकं ॥ तत्फलं पापकर्मेह । परलोके च दुर्गतिः ॥ २८ ॥ संसारोद्विग्नचित्तेन । निर्वाणसुखमिच्छुना ॥ कषायाः परिहर्तव्या—स्तदेतेऽनर्थकारकाः ॥ २९ ॥ अथोचे पार्थिवः

---

छे. ॥ २२ ॥ ते सांभळी राजाए मुनिनुं आगमन कहेनारने तेने संतुष्ट थइ वस्त्रालंकार विगेरे आप्यां. ॥ २३ ॥ (पछी) राजा (पोतानी) राणी अने मंत्रिसहित मुनिने वांदवा माटे त्यां गयो. ॥ २५ ॥ (त्यां) विनयथी करेल छे अंजलि जेणे एवो ते (पोताना) परिवार सहित मुनिना पगने नमीने उचित स्थानके बेठो. ॥ २६ ॥ मुनिए मधुर ध्वनिथी भवसमुद्रमांथी तारवाने नावसरखी धर्मदेशना शरु करी. ॥ २७ ॥ कषायो कडवा वृक्षो (छे) दुर्ध्यान तेनुं फुल छे, अने तेनुं फळ आ लोकमां पापकर्म अने परलोकमां दुर्गति छे. ॥२८॥ तेथी संसारथी उद्विग्न चित्तवा-

सत्यं । महात्मन्नेवमेव तत ॥ ॥ परं पुनर्ममाख्याहि । कति भेदा भवंति ते ॥ ३० ॥ मुनिर्जगौ क्रोधमान—मायालोभाभिधा इमे ॥ तथामीषां च चत्वार—श्चत्वारः खलु भेदकाः ॥ ३१ ॥ आद्योऽनंतानुबंधाख्यो—ऽप्रत्याख्यानो द्वितीयकः ॥ प्रत्याख्यानस्तृतीयस्तु । तुर्यः संज्वलनाभिधः ॥ ३२ ॥ निश्चलोऽचलरेखेव । दारुणो दुःखदायकः ॥ भवेत्स आदिमो राजन् । कोपोऽनंतानुबंधकः ॥३३॥ पृथ्वीरेखासमोऽप्रत्या—ख्यानो नाम्ना द्वितीयकः ॥ प्रत्याख्यानस्तृतीयस्तु । रेणुरेखासमो मतः ॥

---

ळाए ( तथा ) मोक्ष सुख इच्छनारे अनर्थना कारणरूप एवा ते तजी देवा. ॥ २९ ॥ त्यारे राजा बोल्यो हे महात्मन् ! सत्य छे. ते तेमज छे, पण तेनां केटला भेद छे ते मने कहो? ॥३०॥ मुनि बोल्या क्रोध मान माया अने लोभ ( नामना चार भेद छे ). तथा तेओना ( एक एकना ) चार चार भेद छे. ॥ ३१ ॥ पहेलो अनंतानुबंधी नामनो १. बीजो अप्रत्याख्यान २, त्रीजो प्रत्याख्यान ३, अने चोथो संज्वलन नामनो छे ४. ॥ ३२ ॥ हे राजन् ! पहेलो अनंतानुबंधीकोप पर्वतनी रेखासरखो निश्चल भयंकर अने दुःखदायी होय छे. ॥ ३३ ॥ बीजो अप्रत्याख्यान नामनो (कोप) पृथ्वीनी रेखासरीखो, त्रीजो प्रत्याख्यान (कोप) रजनी रेखासरीखो होय छे. ॥३४॥ अने चोथो सं-

॥ ३४ ॥ तुर्यः संज्वलनो नीर—रेखानुमयः प्रकीर्तितः ॥ एवं मानोऽप्यस्थिकाष्ठ—वेत्राश्मस्तं न्निभः ॥ ३५ ॥ माया वंशमेषशृंग—गवां मूत्रावलेहिवत् ॥ लोभः कृमिरागपंकां—जनहारिद्रा ॥ ३६ ॥ जन्मवर्षचतुर्मास—स्थितयस्ते क्रमात्त्रयः ॥ तुर्यः पक्षस्थितिस्ते च । श्वभ्रादिगतिहेतव ॥ ३७ ॥ एवं कषायास्ते राजन् । षोडश प्रकीर्त्तिताः ॥ गाढगाढनरारंभ—कारिणां ते क्रमात्स्मृ ॥ ३८ ॥ स्तोका अपि कषायास्ते । भवन्ति दुःखदायकाः ॥ ततश्चाल्पोऽपि नो कार्यः । कषायो नृपते त्वया ॥ ३९ ॥ राजन्नल्पीयसोऽपि स्याद् । दुष्कृतस्य फलं महत् ॥ मित्रानंदादिसत्वानां । यथा

---

ज्वलन ( कोप ) जळनी रखासरीखा कह्यो छे. एवीरीत मान पण पाषाण, अस्थि, काष्ट, अने नेतरना स्तंभ सरीखो ( छे ). ॥ ३५ ॥ माया वांस पाडाना शींगडां गोमूत्र अने अवलेह जेवी ( होय छे ). ( अने ) लोभ कीरमजी कादव अंजन अने हळदरना रंग जेवो होय छे. ॥ ३६ ॥ तेओ अनुक्रमे यावज्जीव, ( एक ) वर्ष, चार मास अने पंदर दिवसनी स्थितिना ( होय छे. ) अने तेओ नरकविगेरे गतिओना हेतु छे. ॥ ३७ ॥ एवीरीते हे राजन् ! ते शोळे कषायो गाढ अने अतिबहु आरंभ करनाराओने थाय छे. ॥ ३८ ॥ ते कषायो थोडा पण दुःखदायी थाय छे.

दृष्टं मनीषिभिः ॥ ४० ॥ मित्रानंदादयः केऽमी । इत्युक्ते भूभुजा पुनः ॥ दमसारो मुनिः स्माह । तत्कथां शृणुताखिलां ॥४१॥ सुरलोकसमानर्द्धि-नानाजनमनोहरं ॥ अस्तीहामरतिलकं । नगरं भुवि विश्रुतं ॥४२॥ तत्र लोका वसंतिस्म । मूकाः परविकत्थने ॥ परस्त्रीवीक्षणे चांधाः । पंगवोऽन्यधनग्रहे ॥ ४३ ॥ रूपलक्ष्म्यातिशायिन्या-ऽभिभूतमकरध्वजः ॥ मकरध्वजनामा भूद् । भूपतिस्तत्र विक्रमी ॥ ४४ ॥ इंद्रस्य प्रभुता प्रतापनिचयः सूर्यस्य बुद्धिर्गुरो—र्वाणी चंदनशीतला गतिरथो दंतावले·

---

तेथी हे राजन्! तारे अल्प पण कषाय करशो नहि. ॥ ३९ ॥ हे राजन्! अल्प दुष्कर्मनुं पण मोटुं फळ होय छे. जेम के मित्रानंदविगेरे जीवोने (मळेलुं) मनुष्योए जोयुं छे. ॥ ४० ॥ ते मित्रानंदविगेरे कोण एम राजाए पूछतां दमसारमुनि बोल्या तेनी आखी कथा सांभळो? ॥ ४१ ॥ देवलोकजेवी समृद्धि तथा नानाप्रकारना लोकथी मनोहर थयेलुं आ पृथ्वीमां प्रख्यात (एवुं) अमरतिलक (नामनुं) नगर छे. ॥ ४२ ॥ त्यां परनिंदामां मूंगा, परस्त्री जोवामां अंध, (तथा) बीजानुं धन लेवामां लुला लोको रहेता हता. ॥ ४३ ॥ त्यां रूप अने लक्ष्मीना अतिशयपणाथी पराभूत करेल छे कामदेव जेणे (एवो) मकरध्वज नामनो बळवान (राजा राज्य) करतो हतो.

द्रस्य हि ॥ धैर्यं मेरुगिरेर्बलं मृगपतेः कीनाशकोपोऽरिषु । रूपं मन्मथसन्निभं सहजमस्त्वेते गुणा नृप्तुजः ॥ ४५ ॥ राज्ञ्यां मदनसेनायां । पद्मकेसरनामकः ॥ तस्य पद्मसरःस्वप्न—सूचितस्तनयोऽभवत् ॥ ४६ ॥ राज्ञो राज्ञ्या तयान्येद्यु—र्विवृण्वत्या शिरोरुहान् ॥ विलोक्य पलितं दूत । आगादेवेति जल्पितं ॥ ४७ ॥ श्रुत्वेति भ्रांतचित्तस्य । कुर्वतश्च दिगीक्षणं ॥ तस्य राज्ञस्तया शीर्षे । श्वेतकेशः प्रदर्शितः ॥ ४८ ॥ यतः—अंगं गलितं पलितं मुंडं । दशनविहीनं जातं तुंडं ॥ वृद्धो

---

॥ ४४ ॥ इंद्रनी प्रभुता. सूर्यना प्रतापनो समूह. गुरुनी बुद्धि. चंद्र जेवी शीतल वाणी. हाथीनी चाल. मेरुपर्वतनुं धैर्य. सिंहनुं बळ. शत्रुओप्रत्ये यमपणुं. तथा कामदेवजेवुं रूप. आटला गुणो राजाने सहज होय छे. ॥ ४५ ॥ तेने मदनसेना राणीथी पद्मसरोवरना स्वप्नथी सूचित थयेलो पद्मकेशरनामनो पुत्र थयो हतो. ॥ ४६ ॥ एक दिवस तेणीए राजाना केशो समारतां धोळो वाळ जोइ दूत आव्यो एम कह्युं. ॥ ४७ ॥ ते सांभळी (चारे) दिशाओए जोता. तथा भ्रमित (थयेलुं छे) चित्त जेनुं (एवा) राजाने तेणीए श्वेत वाळ देखाड्यो. ॥ ४८ ॥ कह्युं छे के—अंग गळी जाय छे, मस्तकपर धोळा वाळ आवे छे, मुख दांतविनानुं थाय छे, तथा वृद्ध दंड लइने चाले छे,

याति गृहीत्वा दंभं । तदपि न मुंचत्याशापिंडं ॥ ४९ ॥ पटु रटति पलितदूतो । मस्तकमागत्य स
र्वलोकस्य ॥ परिभवतो जरामरणे । कुरु धर्मं विरम पापेभ्यः ॥ ५० ॥ दूतोऽयं धर्मराजेन। प्रेषितः
पलितछलात ॥ आगछति जराकृत्यं । कुरुष्वेति वदन्निव ॥ ५१ ॥ ततश्च पार्थिवो दध्यौ । पूर्व
जैर्मे महात्मभिः ॥ अदृष्टपलितैरेव । धर्मसेवा व्यधीयत ॥ ५२ ॥ धिग्मां स्वपूर्वजानां च । स्थिति
विछेदकारिणं ॥ लुब्धो मूढोऽहमद्यापि । विषयेषु हहास्मि हा ॥ ५३ ॥ इति चिंताविवर्णास्यं । पतिं

---

छतां पण ते आशाना समूहने मूकतो नथी ॥ ४९ ॥ धोळा वाळरूपी दूत सर्वलोकना मस्तकपर
आवी ठीक कहे छे जे जरा अने मरणना परिभवथी धर्म कर? ( अने ) पापथी विराम पाम ?
॥ ५० ॥ धर्मराजे धोळा वाळना मिषथी मोकलेलो दूत जाणे के कहे छे जे घडपण आवे छे,
( माटे करवानुं ) कार्य कर? ॥ ५१ ॥ त्यारे राजाए विचार्युं मारा महात्मा पूर्वजोए धोळा वाळ
देख्या पहेलांज धर्मसेवा करी छे, ॥ ५२ ॥ पोताना पूर्वजोनी रीतिनो विछेद करनारने मने धि
कार छे! अरेरे मूढ ( एवो ) हुं हजुसुधी विषयोमां लुब्ध छुं. ॥ ५३ ॥ एवीरीते चिंताथी विकल
मुखवाळा पोताना स्वामिने जोइने तेनो आशय नहि जाणती राणी नम्रवचनोथी बोली ॥ ५४ ॥

दृष्ट्वा सनर्मवाक् ॥ उवाचैवं पुना राज्ञी । अजातानां तदाशयं ॥ ५४ ॥ नाथ त्वं वृद्धभावेन ।
लज्जसे यदि सर्वथा ॥ तदाहं कारयिष्यामि । पटहोद्घोषणामिमां ॥ ५५ ॥ यः कश्चिदवनीनाथं
। जराग्रस्तं वदिष्यति ॥ भविष्यति सकोऽवश्य—मकालेऽपि यमातिथिः ॥ ५६ ॥ राजा प्रोवाच हे
देवि । किं ब्रवीष्यविवेकिवत् ॥ जरैव मंडनं यस्मा—द्भवेदस्मादृशां किल ॥ ५७ ॥ तदा श्याममु
खा यूयं । किमित्युक्ते तया पुनः ॥ स तस्यै कथयामास । स्वस्य वैराग्यकारणं ॥ ५८ ॥ ततश्च
तनयं राज्ये । संस्थाप्य प्रियया सह ॥ तापसीभूय राजासौ । वनवासमशिश्रयत् ॥ ५९ ॥ गूढानां

---

हे नाथ! वृद्धपणाथी जो आपने सर्वथा लज्जा थती होय तो हुं आ प्रमाणे पटह वगडावुं के
॥ ५५ ॥ जे कोइ अवनीपतीने वृद्ध कहेशे ते अवश्य अकाले पण यमनो अतिथि थशे. ॥
॥ ५६ ॥ राजा बोल्यो हे देवी ! अविवेकीनी पेठे तुं आ शुं बोले छे.? कारणके अमारा जेवा
जनने खरेखर जरा एज भूषण छे. ॥ ५७ ॥ त्यारे आप श्याममुखवाळा केम छो एम तेणीए पूछ
तां तेणे तेने पोताना वैराग्यनुं कारण कह्युं. ॥ ५८ ॥ त्यारपछी पुत्रने राज्ये स्थापी प्रियासहित
तापस थइने ते राजा वनवासमां रहेवा लाग्यो. ॥ ५९ ॥ ( ज्यारे ) ते राणीए तापसव्रत लीधुं

